१०७
५ (B)

107
5 (B)

"अथ"

ग्रन्थनामः-	"विश्वेश्वरसंन्यासपध्दतिः"
कर्तृनामः-	"विश्वेश्वर सरस्वती"
विषयः-	धर्मशास्त्रम्

Vishveshwara Sanyasa Paddhati B

१०७
५

क्षंभोक्तुमर्हति॥ यस्मिन्नक्षांतिक्षमात्रौ चं सत्यं संतोषआर्जवं॥ अकिंचनमदंभं च सर्वे च
ल्पाश्रमेवसेत्॥ यदानकुरुते भावं सर्वभूतेषु पापकं॥ कर्मणा मनसा वाचा तदा भवति भैक्ष्य
भुक्॥ क्रतुः॥ अहमेव परं ब्रह्म वासुदेवाख्यमव्ययं॥ इति भावो दृढो यस्य तदा भवति भैक्ष्यभु
क्॥ संवर्तः॥ पूजितो वंदितश्चैव सुप्रसन्नो भवेद्यथा॥ तथा च ताड्यमानस्तु तदा भवति भै
क्ष्यभुक्॥ भावितैः करणैश्चायं बहुसंसारयोनिषु॥ आसादयति शुद्धात्मा मोक्षं वै चतुर्थाश्र
मे॥ सुमंतुः॥ आपत्काले तु संन्यासः कर्त्तव्य इति शिष्यते॥ जरयाभिपरीतेन शत्रुभिर्व्य
थितेन च॥ आतुराणां च संन्यासे न विधिर्नैव च क्रिया॥ प्रैषमात्रं समुच्चार्य संन्यासं तत्र
कारयेत्॥ संन्यस्तोहमिति ब्रूयात्सवनेषु त्रिषु क्रमात्॥ त्रिवारं स त्रिलोकात्मा शुभाशुभ ६

वद्दंः प्रवर्त्तते॥ तावत्संन्यासोग्निहोत्रं च कर्त्तव्यं तु कलौ युगे॥ विष्णुपु॥ यत्कृते दशभिर्वर्षै
स्त्रेतायां हायनेन तत्॥ द्वापारे तत्तु मासेन अहोरात्रेण तत्कलौ॥ तपसो ब्रह्मचर्यस्य जपा
देश्च फलं द्विजः॥ प्राप्नोति पुरुषस्तेन कृतिः साध्वीति भाषितं॥ इति कलावल्पेन कालेन ब्र
ह्मचर्यस्य जपादेरधिकं फलं वदन्॥ ब्रह्मचर्यादिप्रधानस्य पारिव्राज्यस्य कलावनुष्ठेयत्वं सूच
यति॥ मनुः॥ ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्॥ अनपाकृत्य मोक्षं तु सेवमा
नो व्रजत्यधः॥ अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः॥ इष्ट्वा च शक्तितो यज्ञैः मनो
मोक्षे निवेशयेत्॥ यस्य दृष्टानुश्राविक सर्वेषु विषयेषु दोषैर्वैराग्यं न जायते॥ स एतत्स
र्वं यथाशास्त्रं कृत्वा संन्यसेत् नान्यथेति श्लोकयोरर्थः॥ अन्यथा ब्रह्मचर्यादेव प्रव्रजेदि

त्यादिप्रत्यक्षवेदवचनविरोधादप्रामाण्यप्रसंगात्॥ अजस्य्यध इति मोक्षादर्वाक् मुमुक्षुःस
त्यलोकादिषु वर्त्तत इत्यर्थः॥ नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छतीति भगवद्वचनात्॥
अनाश्रमिणामपि जाबालश्रुत्या संन्यासो विहितः॥ अथ पुनरव्रती वा व्रती वा स्नातको वास्नातको
वोत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेत्॥ तथा यद्यातुरः स्यान्मनसा वाचा वा सं
न्यसेत्॥ सौरपुराणे॥ यदा मनसि वैराग्यं जायते सर्ववस्तुषु॥ तदैव संन्यसेद्विद्वानन्यथा पति
तो भवेत्॥ बृहस्पतिः॥ यस्मिन् कामाः प्रविशंते विषयेभ्योपसंहृताः॥ विषयान्न पुनर्यांति स
कैवल्याश्रमे वसेत्॥ यस्मिन् क्रोधः शमं याति विपुलः सम्प्रगुथितः॥ आक्रोशोऽग्निर्यथाक्षि
प्तः स कैवल्याश्रमे वसेत्॥ उत्पन्ने संकटे घोरे चोरव्याघ्रादिगोचरे॥ भयभीतस्य संन्यासमंगि

रा पुनरब्रवीत्॥ विरक्तः संन्यसेद्विद्वान्निष्ठोपि द्विजोत्तमः॥ अकर्तुमप्यशक्तोपि जुहोति य
जति क्रियाः॥ अंधः पंगुर्दरिद्रो वा विरक्तः संन्यसेद्द्विजः॥ सर्वेषामेव वैराग्यं संन्यासे तु विधीयते॥
पतत्येवाविरक्तो यः संन्यासं कर्तुमिच्छति॥ पुनर्वीर क्रियाभावान्मुमुक्षुर्यः परिव्रजेत्॥ पाराशरः
॥ पारिव्राज्यं तु वैराग्यात्कर्त्तव्यं विधुरादिभिः॥ विधिनात्मज्ञ कुर्वीत संन्यासं स बुद्धिमान्॥
बृहस्पतिः॥ संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया॥ प्रव्रजंत्यकृतोद्वाहाः परं वैराग्यमाश्रि
ताः॥ अत्रिः॥ न तावन्मुच्यते दुःखाज्जन्ममृत्योश्च बंधनात्॥ यावन्न धारयेद्विप्रो वैष्णवं लिं
गमादरात्॥ विष्णुः॥ मुखजानामयं धर्मो वैष्णवं लिंगधारणं॥ बाहुजातोरुजातानां नायं ध
र्मो विधीयते॥ व्यासः॥ परमात्मनोयोरक्तो विरक्तो [illegible]त्मनि॥ सर्वैषणाविनिर्मुक्तः स भै

व्रजेत् ब्रह्मचर्याच्चु यदिछे परमां गतिं ॥ जातपुत्रो गृहस्थो वा विदितात्मा जितेंद्रियः ॥ याज्ञवल्क्यः
२ अधीतवेदोऽजपकृत्पुत्रवानन्नदोऽग्निमान् ॥ रा[illegible]या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा ॥ म
नुः ॥ काषायं पाचयित्वा तु श्रेणिस्थानेषु च त्रिषु ॥ प्रव्रजेत्तु परं स्थानं पारिव्राज्यमनुत्तमं ॥
॥१॥ इत्यादि सर्ववाक्यपर्यालोचनया यमेवार्थोऽवगम्यते ॥ अध्ययननियोग निवृत्त्युत्तरका
लं यस्य पुरुषस्य यस्यामवस्थायां वैराग्यं जायते तस्य तत एव संन्यासेऽधिकार इति ॥ तथा
च श्रुतिस्मृतिः ॥ यदहरेव विरजेत्तदहरेव प्रव्रजेदिति ॥ कात्यायनः ॥ ब्रह्मचर्याद्गृहाद्वापि वना
द्वा संन्यसेद्बुधः ॥ पुत्रेषु भार्यां निक्षिप्य मर्पेत स्त्रीक एव वा ॥ व्यासः ॥ ब्रह्मचारी गृहस्थो वा वा
नप्रस्थोऽथवा पुनः ॥ विरक्तः सर्वकामेभ्यः पारिव्राज्यं समाश्रयेत् ॥ यावद्वर्णविभागोऽस्तिया

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीरामकृष्णपरमात्मने नमो नमः ॥ १
प्रणम्य विष्णुमात्मानं सच्चिदानंदमुत्तमं ॥ गुरुं सर्वज्ञं विश्वेशं मायया धृतविग्रहं ॥१॥ विश्वेश्वर
सरस्वत्या क्रियते वेदमानतः ॥ यतेः परमहंसस्य धर्माणामेष संग्रहः ॥२॥ तत्र संन्यासाश्रमका
लनिर्णयः ॥ जाबालश्रुत्या विहितः ब्रह्मचर्यं समाप्य गृही भवेत् ॥ गृही भूत्वा वनी भवेद्वनी भूत्वा
प्रव्रजेदिति ॥ अव्यवस्थितविकल्पो पि गृहाद्वा वनाद्वेति आरुण्युपनिषदि च ॥ गृहस्थो ब्रह्म
चारी वा न प्रस्थो वा लौकिकाग्नीनुदराग्नौ समारोपयेदिति ॥ तथा कुटीचको ब्रह्मचारी कुटुंबं
विसृजेद्दंडान् ॥ लौकिकाग्नीन्विसृजेदिति ॥ कुटीचकबहूदकसंन्यासिनोः परमहंसस्य विहितं
जाबालश्रुत्या ॥ त्रिदंडं कमंडलुं शिक्यं ॥ पात्रं जलपवित्रं शिखां यज्ञोपवीतं चेत्येतत्सर्वं भूःस्वा

हेत्यप्सु परित्यज्यात्मानमन्विच्छेत् ॥ इत्यारुण्युपनिषदि वेदार्थं यो विद्वान् सोपन
यनादूर्ध्वं प्राग्वा त्यजेत् पितरं पुत्रमग्न्युपवीतं कर्म कलत्रं चान्यदपीति ॥ स्मृतौ च बुध्वा कर्मा
णि यत्कामयेत्तदारभेत् यमिच्छेत्तमावसेदिति ॥ आंगिराः ॥ वनवासाद्गृहाश्रान्तः प्रव्रजेद्विधि
पूर्वकं ॥ व्याध्या विशेषे विरक्तो वा ब्रह्मवित्संन्यसेद्द्विजः ॥ संन्यसेद्ब्रह्मचर्येण संन्यसेद्वा गृहाद
पि ॥ वनाद्वा संन्यसेद्विद्वान् आतुरो वा पि दुःखितः ॥ आतुराणां विनोबोस्तिन विधिनैव च क्रि
या ॥ प्रैषमात्रस्तु संन्यास आतुराणां विधीयते ॥ यदा मनसि संजातं वैतृष्ण्यं सर्ववस्तुषु ॥
तदा संन्यासमिच्छंति पतितस्याद्विपर्यये ॥४॥ यमः ॥ चीर्णवेदव्रतो विद्वान् ब्राह्मणो मोक्षमा
श्रयेत् ॥ समः सर्वेषु भूतेषु चरेषु स्थावरेषु च ॥ उत्पन्नज्ञानविज्ञानो वैराग्यं परमं गतः ॥ प्र

दक्षः॥ तस्मात्यत्न कषायेनैव कर्त्तव्यं दंडधारणं॥ इतरस्तु न शक्नोति विषयैरपहीयते॥ अथान
धिकारि॥ आरूढपतितापत्यं कुनखी श्यावदंतकः। क्षयक्षीणांगविकलो नैव संन्यासम
र्हति॥ संप्रत्यवसितानां च महापातकिनां तथा॥ व्रात्यानामभिशस्तानां संन्यासं नैव कारयेत्॥
व्रतयज्ञतपोदानहोमस्वाध्यायवर्जितं॥ सत्यशौचाश्रमभ्रष्टं संन्यासं नैव कारयेत्॥ बृहस्प
तिः॥ अतीतान्न स्मरेत् भोगांस्तथैवानागतानपि॥ प्राप्तांश्च नाभिनंदेद्यः स कैवल्याश्रमे वसे
त्॥ श्रद्धाध्यानं तपः शौचं यस्य वित्तचतुष्टयं। स्मरणं चाद्वितीयस्य स कैवल्याश्रमे वसेत्॥
अंतःस्थानींद्रियाण्यंतर्बहिःस्थान्विषयान्बहिः॥ शक्नोति यः सदा कर्तुं स कैवल्याश्रमे वसेत्॥ इति
व्यासः॥ यान्यतीतानि जन्मानि तेषु नूनं कृतं भवेत्॥ यत्कृत्स्नं पुरुषेणेह नान्यथा ब्रह्मणि

स्थितिः॥ न मासाद्यनुमुक्तस्य दृष्टोऽर्थस्य विपश्चितः॥ त्रीण्याश्रमेषु कोऽन्वर्थो भवेत्परमभीप्सतः॥ इत्यादिना
विदुषो ब्रह्मणि स्थितस्य पारिव्राज्यं दर्शितं॥ बह्वृचपरिशिष्टे॥ यथोक्तचारिणं भिक्षुं गुरुमेकं परिग्रहेत्॥ ज्ञा
तिवंदैरनुज्ञातो मोक्षाश्रममुपाश्रयेत्॥ इति॥ अथ संन्यासविधिः॥ तत्र बोधायनः॥ अनाश्रमी चतुरः कृ
च्छ्रान्नित्यस्य शुद्ध्यर्थं विदध्यादाश्रमी तप्तकृच्छ्रमेकमिति॥ कृच्छ्रान्प्राजापत्यकृच्छ्रान्॥ तथा च बह्वृचपरिशिष्टे॥ इति
मुमुक्षुरात्मशुद्ध्यर्थमेकं तप्तकृच्छ्रं कृत्वाऽनाश्रमी चतुःप्राजापत्यानिति॥ अनेन कृच्छ्राचरणेनात्मशुद्धिद्वा
रा संन्यासयोग्यता भवति॥ तथा च स्मृत्यर्थसारे॥ कृच्छ्रांस्तु चतुरो कृत्वा पावनार्थमनाश्रमी॥ आश्रमी तप्त
कृच्छ्रं तु तेनासौ योग्यतां व्रजेदिति॥ प्राजापत्यलक्षणं मनुनोक्तं॥ त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं॥
त्र्यहं परं तु नाश्नीयात्प्राजापत्योऽयमुच्यते॥ याज्ञवल्क्यः॥ एकभक्तेन नक्तेन तथैवायाचितेन च॥ उपवासेन
चैवायं पादकृच्छ्रः प्रकीर्तितः॥ यथाकथंचित्त्रिगुणः प्राजापत्योऽयमुच्यते॥ वसिष्ठः॥ अहः प्रातरहर्नक्तम

हरेकमयाचितं॥ अहः परार्कं तत्रैकमेवं चतुरहोपर इति॥ पराकः उपवासः एकस्तं नक्तं मयाचितं उपवास इति।
त्रिरावृत्त्या द्वादशदिनसाध्यः प्राजापत्यः॥ अत्र चग्राससंख्यानियमः॥ पाराशरेण दर्शितः॥ सायं तु द्वादश ग्रा
६ सः प्रातः पंचदश स्मृताः॥ चतुर्विंशतिरयाच्याः परं निरशनं स्मृतमिति॥ आपस्तंबेन त्वन्यथोक्तं॥ सायं द्वाविं
शतिग्रासाः प्रातः षड्विंशतिस्मृताः॥ चतुर्विंशतिरयाच्याः परं निरशनास्त्रयाः॥ कुक्कुटांडप्रमाणस्तु यथावा
स्यविशेन्मुखमिति॥ अनयोश्च विकल्पयोः शक्त्यापेक्षो विकल्पः॥ तप्तकृच्छ्रमाह॥ याज्ञवल्क्यः॥ तप्तक्षीरघृ
श्री तांबुनामेकैकं प्रत्यहं पिबेत्॥ एकरात्रोपवासं तप्तकृच्छ्र उदाहृतः॥ मनुना तु द्वादशरात्रनिवृत्त्याभिहितः॥ क्षी
रादिपरिमाणं पराशरेणोक्तं द्रष्टव्यं॥ अपां पिबेत्तु त्रिपलं तु पयः पिबेत्। पलमेकं पिबेत्सर्पिः त्रिरात्रं चाष्टमा द्विपलं
रुतं इति॥ त्रिरात्रस्य पुरणमुष्णोदकक्वाथं पिबेदित्यर्थः॥ कृच्छ्राद्यनुष्ठाने साधारणेति कर्तव्यता मनुनोक्ता
॥ महाव्याहृतिभिर्होमः कर्तव्यः स्वयमन्वहं॥ अहिंसा सत्यमक्रोधमार्जवत्वं समाचरेत्॥ त्रिरह्नस्त्रिर्निशा
यां तु सवासा जलमाविशेत्॥ स्त्रीशूद्रपतितांश्चैव नाभाषेत कर्हिचित्॥ स्थानासनाभ्यां विहरन्नक्रोध
भा

६

विशुद्धये॥ यत्किंचित्बध्यर्थं कर्म कृतमज्ञानलोभया॥ प्रमादालस्यदोषाद्यत्तत्सर्वं संत्यजाम्य
हं॥ एवं संचिन्त्य भूतेभ्यो दद्यादभयदक्षिणां॥ पद्भ्यां कराभ्यां विहरन्नाहं वाक्कायमानसैः॥ करिष्ये
प्राणिनां हिंसां प्राणिनः संतु निर्भयाः॥ इत्यातुराणां संन्यासं संकल्प्य॥ सावित्रीप्रवेशनपालिहो
मप्रैषोच्चारणाभयदानानि विहितानि॥ गीतासु॥ आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते॥ यो
गारूढ॥ व्यासः॥ प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणं॥ तस्मात् ज्ञानं पुरस्कृत्य संन्यसेदि
ह बुद्धिमान्॥ मनुः॥ दशलक्षणकं धर्ममनुतिष्ठन्समाहितः॥ वेदांतं विधिवच्छ्रुत्वा संन्यासेद
नृणो द्विजः॥ जाबालः॥ संन्यासं निश्चयं कृत्वा पुनर्न च करोति यः॥ स कुर्यात्कृच्छ्रमश्चालंबएमा
सात्प्रसन्नंतरं॥ संन्यासं पातयेद्यस्तु पतितं न्यासयेत्तु यः॥ संन्यासे विघ्नकर्त्ता च त्रिनेतान्विद्धिः
पतिता

आर्षेसभृगुनारदः॥

दिव्यंमानुष्यंभौतिकंततः॥पितॄणांदिव्यमातॄणांमासनोवृद्धिवसरं॥शौनकः॥दैवंचैवार्षकंचैवदिव्यंमा
नुष्यमेवच॥भूतश्राद्धंपितृश्राद्धंमातृणांमासनस्तथा॥एकैकस्मिन्दिनेकुर्यादेकैकंश्राद्धमर्थवित्॥नां
दिमुखेविधानेनविधिरेषप्रकीर्तितः॥इति॥सएवदैवादिश्राद्धेषुदेवताआह॥वसवोष्टौस्मृतास्तत्ररु
द्राश्चैकादशापिच॥तथैवद्वादशादित्यादैवश्राद्धेतुदेवताः॥मरीचिरत्र्यंगिरसौपुलस्त्यपुलहःक्रतुः॥प्र
चेताश्चवसिष्ठश्चसैनंदश्चतृतीयश्चसनातनः॥दिव्येहिरण्यगर्भश्चवैराजपतिरेवच॥सनकश्चस×
कपिलश्चासुरीश्चैववोढःपंचशिखस्तथा॥एतेमानुष्यकेश्राद्धेमानुष्याःदैसप्तदेवताः॥पृथिव्यापस्त
थातेजोवायुराकाशमेवच॥एतानिपंचभूतानिभूतश्राद्धेतुदेवताः॥पितृश्राद्धेकव्यवाहनंवैःसोमोर्य
मातथा॥अग्निष्वात्ताबर्हिषदःसोमपाश्चैवदेवताः॥आत्मश्राद्धदेवातान्तुपरमात्माप्रकीर्तितइति॥अ
त्रिः॥कर्त्तानिरग्निकश्चेत्स्यात्लौकिकाग्नौतदाकुर्यात्श्राद्धार्थीपचनादिकं॥पूर्वेद्युस्तदहन्भक्त्याश्राद्धेवि ८

प्रान्निमंत्रयेत्॥कृत्वातुसंस्कृतंपाकंहविष्यंस्वादुभोजनं॥हृदियस्तेश्वरंध्यायेद्देवंनारायणंप्रभुं॥आ
रभेत्सर्वकर्माणिस्नानादीनिविधानतः॥तर्पयेदंभसास्नात्वामंत्रपूर्वंद्विजोत्तमः॥देवान्ऋषीन्मनुष्यां
श्चभूतानिचयथाक्रमं॥तर्पयित्वांभसासर्वान्पुनःश्राद्धेनतर्पयेत्॥पार्वणंचतथावृद्ध्याश्राद्धंकुर्या
द्यथाविधिः॥दत्वानांदिमुखेभ्यश्चपिंडानक्षतसंयुतान्॥श्राद्धेदेवान्नमस्कृत्ययथोक्तंश्रुतिशासनात्॥
तत्राष्टसुक्रमाद्देवावसवोथप्रजापतिः॥हिरण्यगर्भोथविराडात्मादेवैसमस्यतु॥आर्षेमरीचिप्रमुखादि
व्येचवैनितात्मजाः॥स्कंदःप्रजेशस्तत्रात्मामानुष्येसनकादयः॥कव्यवाहसुखापित्र्येमातृकेदिव्यमातरः
॥सर्वमंत्रेषुकर्त्तव्यंनांदिमुखेविशेषणं॥उत्थाप्यस्ततोविद्वान्दृष्टपुष्टेनचेतसा॥प्रदक्षिणंततोकृत्वान
मस्कृत्यद्विजोत्तमान्॥क्षंतव्यमितितान्ब्रूयात्प्रणम्यशिरसास्ततः॥संन्यासार्हमयाश्राद्धंकृतमेतद्द्वि
जोत्तमाः॥आनुज्ञांप्राप्ययुष्माकंसिद्धिंयास्यामिशाश्वतीं॥दत्तात्रेयः॥देवार्षमानुषंभूतंपितृमातृ

विश्वे श्वरी

स्वयंभुवं॥ श्राद्धं परात्मनः कृत्वा वृद्धौ चापि चतुष्टयं॥ ततः परेद्युः पुण्याहवाचनपूर्वकं वपनं कुर्यात्॥ तथा
६ च शौनकः॥ पूर्वेद्युः नांदिमुखं कृत्वा ब्राह्मणान् भोजयित्वा पुण्याहं वाचयित्वा केशश्मश्रुलोमनखा
नि वापयित्वा यथाविधि स्नात्वा होमादि द्रव्यव्यतिरिक्तद्रव्यजातं पुत्रादिभ्यो दत्वा दंडादीन्निधाय
त देवार्पणं ग्रामे वा पुलिने वारण्ये वा स्थित्वा॥ ब्रह्मणे नमः॰ इंद्राय॰॥ सूर्याय॰॥ आत्मने न॰ अंतरात्मने॰
परमात्मने॰ इति ब्रह्मांजलीं कृत्वा मानं जपित्वा॥ उपस्थ्यस्य दर्भांजलीं कृत्वा वेदादिं जपीत्वा॥ सक्तुमु
ष्टिं प्राश्याचम्य॥ ॐ भूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यं॥ ॐ भुवः सावित्रीं प्रविशामि॥ भर्गोदे
वस्य धीमहि॥ ॐ स्वः सावित्रीं प्रविशामि॥ धीयो यो नः प्रचोदयात्॥ ॐ भूर्भुवस्वः सावित्रीं प्रविशा
मि॥ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि॥ धीयो यो नः प्रचोदयात्॥ इति जपित्वा॥ किंच नमः प्रा द.धः
स्मपुरस्तादित्यस्यास्तमयादाज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा समिद्वत्याग्नौ॥ ॐ भूः स्वाहे ६

श्रुत्वायीतवा॥ ब्रह्मचारी व्रती च स्यात् गुरुदेवद्विजार्चकः॥ सावित्रीं च जपेन्नित्यं पवित्राणि च शक्तितः॥
सर्वेष्वेव व्रतेष्वेवं प्रायश्चित्तार्थमादृत इति॥ प्राजापत्यं क्रियाशक्तौ धेनुं दद्याद्द्विजोत्तमः॥ धेनोरभावे दात
व्यं मूल्यं तुल्यं न संशयः॥ इति॥ संपूर्णदानाशक्तावप्यनुकल्पमाह॥ गवामभावे निष्कं स्यात् तदर्धं पादमेव वे
ति॥ प्रत्याम्नायांतरमप्याह पाराशरः॥ कृच्छ्रायुतं च गायत्र्या उपवासस्तथैव च॥ धेनुप्रदानं विप्राय सममेतच्चतुष्ट
यमिति॥ तथा च षट्त्रिंशन्मते॥ कृच्छ्रायुतं च गायत्र्या द्वादश ब्रह्मभोजनं॥ तीलहोमसहस्रं च सममेतच्च
तुष्टयमिति॥ तथा धेनुर्निष्कस्तदर्धं प्राणायामशतद्वयं॥ तीलहोमसहस्रं च वेदाध्ययनमेव च॥ विप्रा द्वाद
श वा भोज्याः पावकेष्टिस्तथैव चेति॥ तत्र लघुं तु प्राजापत्यद्वयं प्रत्याम्नायकल्पं॥ मुख्यकल्पे समर्थेन चानु
कल्पो न स्वीकर्तव्यः॥ तथा च मनुः॥ प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते॥ न सांपरायिकं तस्य दुर्मतेर्विद्य
ते फलमिति॥ कात्यायनः॥ ५८॥ कुर्यात्कृच्छ्राणि सर्वाणि संन्यासेप्सुरनाश्रमी॥ आश्रमी कृच्छ्रमेकं तु कृत्वा सं
न्यासमर्हति॥ उक्तपुरश्चरणमादौ कृत्वा शुद्धेन कायेनाष्टौ श्राद्धानि निर्वपेदिति॥ अत्रिः॥ दैवमार्षं ततो

तिपूर्णाहुतिं हुत्वा सायमग्निकार्यं कृत्वाग्न्युत्तरदेशे दर्भेषु पात्राणि सादयित्वा ॥ अग्निं दक्षिणदेशे दर्भान्
संस्तीर्य ॥ कृष्णाजिनं चातर्द्धाय तस्यां रात्र्यां जागरणं कृत्वेति ॥ अत्र विशेषमाह ॥ बौधायनः ॥ ब्राह्मणा
नं ते आवेश्य उपवेश्य ततः वपनं कुर्यात् ॥ कात्यायनः ॥ आपो हिष्ठा इति द्वाभ्यां श्मश्रुरोमनखानि च गो
दानकविधानेन सर्वमंत्रान्नियोजयेत् ॥ समाप्ते केशान् शिखार्थं स्थापयेत् ॥ तथा च संप्रदायविदः ॥ शेष
स्य कर्मणः ॥ सिद्ध्यै केशान् ससाष्टवाद्विजः संरक्ष्य वापयेत् ॥ सर्वकेशश्मश्रुनखानि चेति ॥ गोभिलः ॥
ततः समाचरेत्स्नानं हेमरौप्यकुशांभसा ॥ कृत्वानुवपनं विद्वान्भवेन्मुंडो यथाशिखी ॥ स्नानमथैवतैः
कृत्वा तर्पयेद्देवता पितॄन् ॥ ऋषीन् छंदांसि वेदांश्च मनुष्यांश्च यथाविधीति ॥ ततः आगत्य देवतायतना
दौ उपविश्य दक्षिणजानुनि उत्तानं वामहस्तं कृत्वा तत्र द्वे पवित्रे निधाय तदुपरि दक्षिणहस्तेन पिदध्यादिति ॥
ब्रह्मांजलिः तं ब्रह्मांजलीं कुर्यात् ॥ जपेच्च ॥ ब्रह्मणे नम इत्यादिमंत्रान् ॥ ततः आचम्य वेदादीन् जपेत् ॥

९ अपउपस्पृश्यदर्भांजलींकृत्वावेदादीन्जपेति॥शौनकवचनात्॥ततःसक्तुमुष्टिंप्रणवेनप्राश्या
चम्यमंत्रेणनाभिंमंत्रयेत्॥तदुक्तंबह्वृचपरिशिष्टे॥अथसक्तून्प्राश्याचम्यनाभिंमंत्रयेत्॥आत्मने
स्वाहाप्रजापतयेस्वाहेति॥ततःपयोदधिघृतानित्रिवृत्कृत्वानित्रिवृदसीतिमंत्रेणप्रथमंप्राश्नी
यात्॥प्रवृदसीतिद्वितीयं॥विवृदसीतितृतीयं॥ततःआपःपुनंतुपृथिवीमित्युदकंप्राश्नीयात्॥ततःउ
पवासंसंकल्पयेत्॥तदुक्तंबौधायनेन॥ग्रामांतेग्राममसिमांतेअग्न्यागारेवाऽपिपयोदधिसंयुतंत्रिःप्राश्यो
पवसेत्॥त्रिवृदसीतित्रिभिर्मंत्रैःसकृदापःपुनंत्वितीतिपयआद्यालाभेआपःप्राश्नीयात्॥तदुक्तं
बह्वृचपरिशिष्टे॥अथपयोदधिसर्पींषित्रिवृत्प्राश्याचमेत्॥आपःस्तद्लाभेइतिततःसावित्रींप्र
विशेत्॥तत्प्रकारमाहतुः॥बह्वृचपरिशिष्टेबौधायनौ॥ॐभूःसावित्रींप्रविशामि॥तत्सवितुर्वरे
ण्यं॥ॐभुवःसावित्रींप्रविशामि॥भर्गोदेवस्यधीमहि॥ॐस्वःसावित्रींप्रविशामि॥धीयोयोनःप्रचो

नाहवनीयं ब्रह्मायतने दर्भानास्तीर्य कृष्णाजिनं चांतर्धाय तां रात्रीं जायतीति ॥ यथा दत्तात्रेयः ॥ हो
मं दत्वा तथा सायं कुर्यात् कृष्णाजिनं ततः ॥ ब्रह्मस्थाने समास्तीर्य कृष्णाजिनं चांतर्धाय ब्रह्मभाव
नेन संस्थितः ॥ ब्रह्मरात्रीं ततो दत्वा विधौ संन्यस्य मानसं समभ्यर्च्य हृषीकेशं जपन्नेकाक्षरं परं ॥
इति ये एवं विद्वान् ब्रह्मरात्रीमुपोष्य ब्राह्मणोग्निं नु समारोप्य वा प्रमीयते ॥ सर्वपाप्मानं तरति ब्रह्मह
त्यामिति ॥ ततो ब्राह्मे मुहूर्ते इत्य माह शौनकः ॥ ब्राह्मे मुहूर्ते उत्थाय यथाविधि स्नात्वा प्रातरग्नि
कार्यं कृत्वा व्याहृतिं जपित्वा त्तरत्स मंदी धावतीति सूक्तमप्सु जपेदिति ॥ तत आहिताग्निश्चेत् प्राजा
पत्येष्टिं कुर्यात् ॥ एकोग्निश्चेत् तदाग्नेयीं ॥ तथा च जाबालश्रुतिः ॥ तदु हैके प्राजापत्यामेवेष्टिं कुर्वंति त
दु तथा न कुर्यात् ॥ आग्नेयीमेव कुर्यात् ॥ इति अत्र प्राजापत्येष्टिराहिताग्नेस्तद्वाक्यशेषेग्नीनीति च
बहुवचनश्रवणात् ॥ आग्नेयीमेव कुर्यात् एकाग्नेस्तद्वाक्यशेषेग्निमजिघ्रेदित्येकवचनाश्रवणात्स

नुः ॥ प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणां आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ॥
दत्तात्रेयः ॥ ब्रह्मरात्रीं ततो दद्यात् पौर्णमास्यां द्विजोत्तमः ॥ प्रातर्हुत्वा स्वकालेन कृत्वा स्नानादिकां
क्रियां ॥ प्राजापत्यां प्रतिपदि कृत्वेष्टिं तु यथाविधि ॥ ततो विप्राय दद्यात्तु सर्ववेदसदक्षिणां ॥ अथ
वाहिताग्निर्वैश्वानरीं वेष्टिं कुर्यात् ॥ यथा च श्रुतिः ॥ आग्नेयीमेव कुर्यात् ॥ अग्नये वैश्वानराय द्वाद
शाकपालं पुरोडाशं निर्वपति ॥ प्राजापत्यं चरुं वैष्णवं त्रिकपालं चेति ॥ अत्र विशेषो बौधायनेनोक्तः ॥ दे
स्मृति वयजने विष्णुर्वैवप्रभृत्याग्निमुखांतं कृत्वा पंचपा जुहोति वैश्वानराय प्रतिवेदयाम इति ॥ पुरोनुवा
क्यामनूच्य वैश्वानरः पवमानः पवित्रेणेति ॥ आज्याहुतिं जुहोति ॥ वैश्वानरो न ऊत्या इत्यस्य प्राभि
रनुछंदसमग्नये स्वाहेति च ॥ अथैनमुपतिष्ठते ॥ सहस्रशीर्षा पुरुष इत्यानुवाकेन स्विष्टकृत्प्रभृ
तिसिद्धा धेनुवरप्रदानात् ॥ अथाग्निघो दर्भस्तंभेषु हलशेषं निदधाति ॥ सर्वो वै रुद्रं विश्वंभरतामिति ॥

विश्वे

द्वाभ्यामुन्मृजत्यग्निआयुर्दाअग्नेहविषाजुषाणइतिअपक्वादुपादाय प्रक्षाल्य प्राश्नाति सहस्रात्रीत्ये घरी
प्राश्याचम्यात्मानं प्रत्यभिमन्त्रयते सोमिति॥ अस्तेत्यं त्तेनानुवाकेनाप्याग्निद्रव्यमग्नौ प्रक्षिप्यात्मन्यग्नी
न्समारोपयेत्॥ यातेअग्नेयज्ञियातनुरिति तत्रैव विशेषः॥ शौनकः॥ प्राजापत्ययेष्ट्वा पुनराहवनीय
मुद्धृत्य प्राणापानौ समौ कृत्वा सर्वं निदधाति॥ यच्च पूर्वं यच्च प्रज्ञातोत्तमौ सि जुहोमि विमुक्तोहं देवकि
ल्बिषात्॥ स्वाहा॥ अयंतेयोनिरृत्वियइत्यात्मन्यग्नीन्समारोपयति॥ प्राणेन गार्हपत्यं अपानेन
दक्षिणाग्निं व्यानेनाहवनीयं गत्वा अद्भ्यः संभृत इत्यादि समुपस्थायोत्तरनारायणेन गृहाग्निः॥ क्रमेदिति
पात्रविशेषाणां प्रतिपत्तिमाह॥ दत्तात्रेयः॥ मन्मयान्यश्ममयानि चाप्सु जुहुयात्॥ गुरूवैतैजसानिद
द्यात्॥ इति॥ यमन्नतश्चाहवनीयारण्ये हुत्वा पात्राणि मंत्रतः॥ असौ स्वर्गाय लोकाय स्वाहेत्यवनीधाप
येत्॥ अयंतेयोनिरित्येवं समारोप्यात्मनो मुखे॥ ततो वैश्वानरं ध्यायेत्स्वर्गाख्यविश्वलोमु

दयात्॥ ॐ भूर्भुवस्वः॥ सावित्रीं प्रविशामि॥ सर्वां गायत्रीं जपेत्॥ ततः किंचनापः प्राश्य ततोस्तम
यात्पूर्वमाहिताग्निश्चेदाहवनीये एकाग्निश्चेदौपासनाग्नौ स्रुवेण स्रुचि आज्यं चतुर्गृहीत्वा स्रुचा॥ ॐ
स्वाहेति जुहुयात्॥ एतत् ब्राह्मणान्वाधानं॥ तत्र बोधायनः॥ पुरा दिनस्यास्तमयात्॥ गार्हपत्यं समाधा
यान्वाहार्यपचनमाहुतं ज्वलंतमाहवनीयमुद्धृत्य गार्हपत्ये समाज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीत्वा स
मिद्धेत्वाहवनीये पूर्णाहुतिं जुहोत्यों स्वाहेति एतद्ब्रह्मान्वाधानमिति विज्ञापयत्तइति॥ तथा च कात्या
यनः॥ औपासनमावसथ्यं पृष्ठोदिविं जपेत वाल्लौकिकाग्निमिलरं वापि श्रद्धावान्स यदा भवेत्॥ इत्युप
क्रम्य तस्मिन्होमं महायज्ञान्कुर्यात्प्रक्ष्यादिकर्म च॥ संन्यासार्थी तथा कुर्यात्॥ पाकयज्ञादिकानपि॥ इत्यु
क्तत्वात्॥ ततः संध्यावंदनपूर्वकं अस्तमितआदित्ये स्वाग्नौ होमं कुर्यात्॥ तत्र बोधायनः॥ अथ सा
यं हुतेग्निहोत्र उत्तरेण गार्हपत्यं तृणान्यास्तीर्य द्वंद्वं पात्राण्यासादयित्वा ष्पादीनि कृत्वा वा सोक्षिणे

धेनुं च दत्त्वाचार्यपुरतो वस्थितः ॥ सं मा सिंचतु मरुतः समिंद्रो बृहस्पतिः सं मायमग्निः सिंचत्वा
युषा च बलेन चायुष्मंतं करोतु मामिति जपित्वा ॥ याते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मनात्मानं
१२ अच्छा वसूनि कृण्वन्नस्मे नर्यापुरूणि यज्ञो भूत्वा यज्ञमासीद स्वां योनिं जातवेदो भुव आजाय
मानः ॥ स क्षय एहीति त्रिरात्रिरात्मन्यग्नीन् समारोपयेति ॥ अनग्नेस्तु समारोपप्रयदेकाग्निरेका
ग्निः एव नास्ति तत्र बह्वृच परिशिष्टं ॥ अथात्मन्यग्नीन् समारोप्येदेकाग्निरेकाग्निमनग्निर्नकुं
च नेति अनग्निना कपिलप्रोक्तेन विधिना संन्यासः कर्त्तव्यः ॥ तमपि संक्षेपतो दर्शयिष्यामः ॥ नां
दिमुख ब्राह्मणभोजन पुण्याहके शश्मश्रुलोमनख वपन स्नान सर्वदा दंडादि सन्निधान त्रिवृद्धा
शन सावित्री प्रवेशन संध्याराधनानि कृत्वोपोष्य स्नात्वा संध्याराधनं कृत्वा देवर्षि पितृतर्पणं कृत्वा
चाद्यः स्वाहेति पुत्रेषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थितोहं स्वाहेति अप्सेवापः

पाणिना हुत्वा यथाधिकारं यथाविधिं दंडादि गृहीत्वा स्वधर्मनिष्ठो भवेदिति ॥ साग्निकस्तु उक्तेन
प्रकारेणाग्निसमारोपं विधाय जलाशयं गच्छेत् ॥ ततः पुत्रं दृष्ट्वा त्वं ब्रह्मेत्यादि वाक्यत्रयं जपेत् ॥ तथा च
शौनकः ॥ पुत्रं दृष्ट्वा जपति त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति ॥ स पुत्रः प्रत्याहेदं ब्रह्माहं यज्ञोहं लोक इतीति ॥ त
था च बह्वृच परिशिष्टे ॥ अथ पुत्रान् सुहृदो बंधून् प्रत्याह न मे कश्चिन्नाहं कस्यचिदितीति ॥ ततः आ
श्रमात्संन्यासाश्रमं गच्छामिति संकल्पयेत् ॥ ततः अप्सेचोदकांजलिद्वयमाह ॥ कपिलः ॥ अद्यः स्वाहा पुत्रैष
णायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थितोहं स्वाहेति अप्सेवापः ॥ पाणिनाहुत्वेति तत्तो यज्ञोपवि
तं हस्तेन गृहीत्वा द्रींकृत्य चेदांतविज्ञानेति मंत्रेणाप्सु जुहुयात् ॥ तथा बोधायनः ॥ अथ यज्ञोपवीतं वि
सृज्याद्भिः समर्ज्याप्सु जुहोति ॥ वेदांतेति ॥ आरुण्युपनिषदि च ॥ उपवीतं भूमौ वाप्सु वा विसृज्यत्
इति ॥ तथा शिखार्थे रक्षितान् केशान् उद्धाय भूः स्वाहेति भस्मावप्सु चानिक्षिपेत् ॥ तथा च कठवल्लिः

सशिखान् केशान् निकृत्य विसृज्य यज्ञोपवीतं भूः स्वाहेति ॥ तथाथर्वणश्रुतिरपि ॥ सशिखं वपनं कृत्वा
बहिः सूत्रं त्यजेद्बुधः ॥ ततः प्रैषोच्चारप्रकारमाह ॥ आरुणीश्रुतिः ॥ ब्रह्मसूत्रमहं चेति विद्वान् त्रिवृत्सू
त्रं त्यजेद्विद्वान् य एवं वेद ॥ संन्यस्तं मया संन्यस्तं मया संन्यस्तं मयेति ॥ त्रिरुक्त्वा अभयं सर्वभूतेभ्यो
मत्तः सर्वं प्रवर्तते ॥ सखा मा गोपायौजः सखा योसि इंद्रस्य वज्रोसीत्यनेन मंत्रेण कृत्वोर्ध्वं वैणवं दंडं
कौपीनं परिग्रहेदिति ॥ बह्वृचपरिशिष्टे ॥ प्राङ्मुखस्तिष्ठन् ऊर्ध्वबाहुर्ब्रूयात् ॥ भूः संन्यस्तं मया ॥ भुवः
संन्यस्तं मया ॥ स्वः संन्यस्तं मयेति ॥ त्रिरुपांशु त्रिर्मध्यमं त्रिरुच्चैरिति प्रकारांतरमाह ॥ शौनकः ॥ ॐ
भूर्भुवः स्वः संन्यस्तं मया संन्यस्तं मया संन्यस्तं मयेति मंदमध्यमोत्तमस्वरेणोक्त्वा अभयं सर्वभूते
भ्यो दत्तमिति ॥ प्राङ्मुखो वोदङ्मुखः पूर्वांजलिं निनयनं कृत्वा यथाकारं यथाविधि दंडादि गृहीत्वा स्व
धर्मनिष्ठो भवेदिति बोधायनस्तथाह ॥ ॐ भूर्भुवः स्वः संन्यस्तं मया संन्यस्तं मया संन्यस्तं मयेति १३

खं ॥ अथ गार्हपत्येऽग्नौ जुहुयादारणं बुधः ॥ अयमग्निर्गृहपतिर्मंत्रेणानेन भावितः ॥ अयं ते योनिरित्ये
वं समारोप्यात्मनो हृदि ॥ ततो वैश्वानरं ध्यायेद् रुक्मसंभं विश्वतोमुखं ॥ जुहुयाद्दक्षिणाग्नौ चमुत्रालो
लुखलेतत्तः ॥ अयमग्निः पुरीष्येति मंत्रेणानेन यत्नतः ॥ अयं ते योनिरित्येवं मनस्यारोप्य वेदवित् ॥
ध्यायेद्वैश्वानरं देवं मंतरिक्षास्त्य मध्यगं ॥ गत्वाथ गार्हपत्यसूक्तेनैव पुरुषं जपेत् ॥ वेद्या मध्ये ततः
स्थित्वा कोसीति तु जपेद्द्विजः ॥ इति एकाग्निः निरग्नी तु शौनकोक्तेन विधिना चरुं श्रपयित्वा होमा
दि कुर्यात् ॥ सउत्संते ॥ ब्राह्मे मुहूर्ते उत्थाय यथाविधि स्नात्वा प्रातरग्निकार्यं कृत्वा व्याहृतिर्जपि
त्वांतरत्समंदीस्सूक्तमप्सु जपित्वा स्वगृह्योक्तेन विधिना चरुं श्रपयित्वा ॥ अग्निमुपसमाधाय ॥
प्राणाय स्वाहा ॥ उदानाय स्वाहा ॥ समानाय स्वाहा इति आज्यहोमं कृत्वा अथ पुरुषसूक्तेन प्रत्यृचमाज्य
होमं कृत्वा पुरुषसूक्तं जपित्वा प्रणीतापात्रं संसृज्य सोविष्टां तं हुत्वा ॥ आचार्यायाज्यपात्रं हिरण्यं

इंद्रस्य वज्रोसि वार्त्रघ्नं सर्वं मे बध्यस्य सापत्नं निवारय। इत्यनेन मंत्रेण दंडं संप्रार्थयेत्॥ मंत्रलिंगा
च्च प्रार्थनायां विनियोगः॥ ततः सखा मां गोपायेति॥ मैत्रायणीश्रुतिरपि इंद्रस्य वज्रोसीति
त्रिवीन्वैणवान् दंडान् दक्षिणे पाणौ धारयेत्॥ यदक्रीवायधेकृ तदा सशिखं वपनं कृत्वा विसृज्य
यज्ञोपवीतं चतुर्वर्णेष्वेकागारे भैक्ष्यं समश्नीयात्॥ माधुकरी चेति कामं मे वैणवं दंडं धारयेदि
त्यारुणिश्रुतिः॥ दंडलक्षणमाह॥ अत्रिः॥ धारयेद्वैणवं दंडं न स्थूलं न कृशं तथा॥ तस्य चाग्रे च
मूले च ग्रंथिं त्यक्त्वा तु धारयेत्॥ द्वि चत्वारि षडष्टौ वा ह्यंगुलानि समाहितः॥ न्यूनं नातिरिक्तं च
द्विगुणं मूलतोग्रके॥ भविष्यपुराणे॥ दंडं तु वैणवं रम्यं सत्वचं समपर्वणं॥ पुण्यस्थानसमुत्प
न्नं नानाकल्मषशोधितं॥ अदग्धमहतं कीटैः पर्वग्रंथिविराजितं॥ स्वयंभूतं तु मेदिन्या गात्रावद्
र्जं मृजुं शुभं॥ नासादघ्नं शिरस्तुल्यं भ्रुवोर्वा बिभृयाद्यतिः॥ विष्णुः॥ एकदंडी भवेद्वापि त्रिदंडी

वाथवा भवेत्॥ कण्वायनः॥ एकदंडधरा मुंडा इति जमदग्निः॥ दंडात्मनस्तु संयोगः सर्वदैव वि
धीयते॥ न दंडेन विना गच्छेदिषुक्षेपत्रयं बुधः॥ जलांतरादिषुक्षेपान् कश्चिद्दोषभाग् भवेत्॥ शि
ष्यादिभिर्विनीते पिनीत्त एव स आत्मना॥ हस्तपादादि विच्छिन्द्यादिति शिष्टा वदंति हि॥ संन्यासो ना
मत्यजन् सर्वमाश्रमादनाश्रमाद्वा आश्रमं गच्छामीति संकल्पप्रैषोच्चारणाभयदानानीतिनां दीक्षु
खादि दंडग्रहणांतस्तु क्रियाकलापोस्यैवांगभूतोऽ तत्र आतुरस्य संकल्पप्रैषौ अभयदानमात्रा
फलं श्रूयते यद्यातुरस्याद्वाचा मनसा वा संन्यसेदेष पंथा ब्रह्मानुवित्तस्तेनेति॥ संन्यासि ब्रह्मवि
देव मे वेषाभगवन्निति॥ वेदेह इत्यादिनां स्मर्यते च॥ संन्यस्तमिति यो ब्रूयात् प्राणैः कंठगतैरपि॥ न त
क्रतु सहस्रेण फलं प्राप्नोति मानवः॥ इत्यादीनां सोपिजीविष्यति चेद्यथाधिकारं यथाविधि दंडादि
ग्रहीत्वा भिक्षुधर्मनिष्ठो भवेदिति॥ त्रिदंड्यपि स्वपरिग्रहं परित्यज्य परमहंसो भवेत्॥ तथा च स्मृतिः

दिक्रम

त्रिदंडं कुंडिकां चैव सूत्रं वाथ कपालिकां॥ जंतूनां वारणं वस्त्रं सर्वं भिक्षुः परित्यजेत्॥ बौधायनेनोक्त
स्य त्यागविधिः॥ आरण्यं गत्वा शिखामुंडः काषायवासः॥ वाङ्मनः कर्मदंडैर्भूतानामद्रोही यज्ञोपवी
तं वेदं त्रिदंडं कमंडलुपात्रं परित्यज्य विसृज्य सर्वकर्माणि सर्वसहः सर्वसंगनिवृत्तो प्रसन्नमनाः॥
१५ सुखासीनो विश्वरूपमात्मानं चिंतयेदिति॥ अथ त्याज्यनिरूपणं॥ बृहदारण्यके॥ एवमेवैतमा
त्मानं विदित्वा ब्राह्मणाः॥ पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायेति॥ आरुण्युपनि
षदि॥ आरुणिः॥ प्रजापतिलोकं जगाम तं गत्वोवाच केन भगवान् कर्माण्यशेषतो विसृजामीति
तं होवाच प्रजापतिस्त्वं पुत्रान् भ्रातॄन् बंध्वादीन् शिखां यज्ञोपवीतं यागं स्वाध्यायं च भूर्लोकभु
वर्लोकस्वर्लोकमहर्लोकजनोलोकतपोलोकसत्यलोकं च॥ अतलपातालवितलसुतलरसा
तलतलातलमहातलब्रह्मांडं च विसृजेत्॥ दंडमाच्छादनं कौपीनं परिग्रहेत् शेषं विसृजेदि

त्रिरुपांशु उच्चात्रिरुच्चैः स्त्रिःसत्यादिदेवा इति हि विज्ञायते अभयं सर्वभूतेभ्यो मत्त इति॥ आपां पूर्णा
ञ्जलिं निनयतीति॥ ततो विष्णुप्रार्थनाप्रकारमाह॥ यमः॥ दत्वा तोयांजलिं विप्रो भक्त्या संप्रार्थये
द्धरिं॥ सर्वदेवास्तु केतो यतो याहुतिमहं हरे॥ दत्वा सर्वैषणां त्यक्त्वा युष्मच्छरणमागतः॥ त्राहि मां सर्व
लोकेश गतिरन्या न विद्यते॥ संन्यस्तं मे जगन्नाथ पाहि मां मधुसूदन॥ त्राहि मां सर्वलोकेश वासु
देव सनातन॥ संन्यस्तोहं जगद्योने पुंडरीकाक्ष मोक्षद॥ अहं सर्वाभयं दत्वा भूतानां परमेश्वर॥ यु
ष्मच्छरणमापन्नं त्राहि मां पुरुषोत्तमेति॥ ततो दिगंबरो भूत्वा किंचिदुदङ्मुखो गच्छेत्॥ ततो विविदि
षुश्चेत्कुर्वन्नुत्तरया प्रव्रज्य गुरुसमीपे तिष्ठेदिति तथा च संप्रदायविदः॥ ततो दिगंबरो भूत्वा गच्छे
त् किंचिदुदङ्मुखः॥ जिज्ञासुश्चेत् परावृत्त्यास्ति ष्ठेत्तनुशासनात्॥ इति॥ ततो दोरकं कौपीनं बहिर्वा
सं कंथां दंडं चक्रमेणैकैकं प्रणवेन दधात्॥ तथा च बह्वृचपरिशिष्टे॥ अन्यत्सर्वं प्रणवेनेति॥

मेव प्रव्राजिनो लोकमिच्छंतः॥ प्रव्रजंति प्रकृत मात्मान मेव लोकमिच्छंतः॥ प्रव्रजेयुरित्यर्थः॥ छांदो
ग्ये ब्रह्मसंस्थोऽमृतत्वमेति॥ त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमं॥ त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्य
क्परं पदं॥ इति भाल्लवीयश्रुतिः॥ न कर्मणा न प्रजया न धनेन त्यागेनैके अमृतत्वमानशुरिति॥ तैत्ति
रीयके॥ अथ परिव्राड्विवर्णवासा मुंडोऽपरिग्रहः॥ शुचिरद्रोही भैक्षमाणो ब्रह्मभूयाय कल्पते॥ इ
ति जाबालश्रुतिः॥ शतं कुलानां पुरतो बभूव तथा पराणां त्रिशतं समग्रं॥ एते भवंति सुकृतस्य लो
के येषां कुले संन्यसतीह विप्रः॥ संन्यासात्॥ ब्रह्मणः स्थानं वैराग्यात्प्रकृतौ लयः॥ ज्ञानात्कैवल्यमाप्नोति
तिस्रोऽस्तागतयः स्मृताः॥ याज्ञवल्क्यः॥ वज्रकार्यकारिभिदानं चेगो न ध्याश्वशुद्धिकृत्॥ स्रोध्यस्य मध्य
त्तोऽयं च संन्यासोऽपि द्विजन्मनां॥ विष्णुः॥ एकरात्रोषितस्यापि यतेर्या गतिरुच्यते॥ न सा शक्या गृहस्थेन
प्राप्तुं क्रतुशतैरपि॥ संन्यस्तमिति यो ब्रूयात्प्राणैः कंठगतैरपि॥ न तु क्रतुशतेनापि प्राप्तुं शक्नोति

१६

मानवः॥ संन्यस्तं तु द्विजं दृष्ट्वा स्थानाच्चलति भास्करः॥ अयं मे मंडलं भीत्वा परं ब्रह्माधिगच्छति॥ द
क्षः॥ त्रिंशत्परान् त्रिंशदवरान् त्रिंशच्च परतः परान्॥ सद्यः संन्यसनादेव नरकात्तारयेत्पितॄन्॥ जाबा
लः॥ चतुर्वेदस्तु यो विप्रः सोमयाजी शतक्रतुः॥ तस्मादपि यतिः श्रेष्ठो मेरुसर्षपयोरिव॥ कपिलः॥ संन्य
स्तमिति यो ब्रूयात्प्राणैः कंठगतैरपि॥ स क्षयान्न लभते लोकान्न पुनर्जन्म विद्यते॥ अंगिराः॥ ऋषिकु
लोत्पन्नो तानि षष्टिमागामिकानिवा॥ कुलानुद्धरते प्राज्ञः संन्यस्तं इति यो वदेत्॥ यच्च संजातजा दोषा ये
पि स्युः कर्मसंभवाः॥ संन्यासस्तान् दहेद्दोषान् तुषाग्निरिव कांचनं॥ सूर्यखद्योतयोर्यद्वत् मेरुसर्षप
योरिव॥ अंतरं हि महद्दृष्टं तथा भिक्षुगृहस्थयोः॥ मनुः॥ यो दत्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात्॥
तस्य तेजोमया लोका भवंति ब्रह्मवादिनः॥ यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयं॥ तस्य देहाद्विमु
क्तस्य भयं नास्ति कुतश्चन॥ ब्रह्मविदः॥ सगुणब्रह्मविद इत्यर्थः॥ तेजोमयलोकसंबंधात्कर्तृत्वा

देरबाधितत्वाभयशंका॥ भावश्चन हि परब्रह्मविदस्तेजोमयलोकसंबंधो भयाशंका स्यात्तब्रह्मैव
सन्ब्रह्माप्येति न बिभेति कुतश्चनेति श्रुतेः॥ गृहस्थो ब्रह्मचारी च वानप्रस्थोथ भिक्षुकः॥ य इच्छे
न्मोक्षमास्थातुमुत्तमां वृत्तिमाश्रयेत्॥ यमः॥ ज्ञानेन मुच्यते भिक्षुस्तपसा स्वर्गमाप्नुयात्॥ नर
कं विषयासंगात्त्रयो मार्गास्तपस्विनां॥ व्यासः॥ कर्मणा बध्यते जंतुर्विद्यया च प्रमुच्यते॥ तस्मात्क
र्म न कुर्वंति यतयः पारदर्शिनः॥ यस्य संन्यसनादेव स्थानाच्चलति भास्करः॥ कुलकोटिशतैः सार्द्धं
प्राप्नोति परमं पदं॥ दिव्यतेजोमयः श्रीमान्सूर्यचंद्राग्निमंडलं॥ भित्वा प्रयाति संन्यासि स्वधर्म
परिपालनात्॥ उक्तेन विधिना संन्यासं विधायात्मज्ञानाय गुरुसमीपं गच्छेत्॥ उक्तं चाथर्वणोप
निषदि मुंडके॥ परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्॥ नास्त्यकृतः कृतेन तद्विज्ञाना
र्थं स गुरुमेवाभिगच्छेत्॥ समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति तत्तो विनयादिगुणयुक्तो गुरुमुपग १८

ति॥ काटके च॥ यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यतिरिति॥ परमहंसोपनिषदि॥ असौ स्वपुत्रमित्रकल
त्रबंध्वादीन् शिखां यज्ञोपवीतं यागं सूत्रं स्वाध्यायं च सर्वकर्माणि संन्यस्यायं ब्रह्मांडं च हित्वा कौ
पीनं दंडमाच्छादनं च स्वशरीरोपभोगार्थाय च॥ लोकस्योपकारार्थाय वा परिग्रहेत्॥ इति न्यासश्च॥
त्यज धर्ममधर्मं च उभे सत्यानृते त्यज॥ उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज॥ याः काश्चिज्जीवि
ताशा काम्यस्य कुं नित्यक्षताः क्रियाः॥ ताः सर्वाः संपरित्यज्य निमेषादिषु वा स्थितः॥ अत्रिः॥ शेषं वित्तं
त्यजेद्विप्रो धनधान्यादिकं च यत्॥ अत्यागात्सर्ववित्तानां संन्यासो निष्फलो भवेत्॥ बाष्कलायनः॥
कुटुंबं पुत्रदारांश्च वेदांगानि च सर्वशः॥ यज्ञं यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः॥ सुमंतुः॥ एषत्या
ज्यमहं सर्वकामभोगादिकं सुखं॥ शोकं तोषं विवादं च गंधमाल्यानुलेपनं॥ भूषणं नर्तनं गेयं दान
मादानमेव च॥ इत्यादि॥ अथ श्रुतिस्मृतिभ्यामवगम्यमानं संन्यासफलं प्रदर्शते॥ बृहदारण्यके॥ एत

विश्व दधामि॥ मम चित्तमनुचित्तं तेऽअस्तु मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति॥ श्वरी
हृदये देश इति दीक्षायां प्रमाणं॥ भिक्षुर्भिक्षुधर्ममुपसंगृह्य भिक्षुगुणसंपन्नमाचार्यमुपसंग
म्य तत्सन्निधौ दीक्षां परिगृह्णीयादिति॥ गलकंचनांततः॥ उदङ्मुखाय नित्यशुद्धबुद्धमुक्तसत्यपरमा
नंदाद्वयं ब्रह्मप्रतिपादकं प्रणवं दक्षिणे कर्णे प्राङ्मुखः सन्नुपदिशेत्॥ प्रणवस्य चार्थमाचार्यो व
चनेन बोधयेदाचार्यैः वचनं च॥ ॐ पञ्चीकृतपञ्चमहाभूतानीत्यादि ततस्त्वायमात्मा ब्रह्म तत्त्वमसि
प्रज्ञानं ब्रह्मेत्यादीनि शिष्यशाखावाक्योपदेशपूर्वकमुपदिशेत्॥ तेषामर्थं च बोधयेत्॥ ततो नाम
दद्यात्तथा च॥ बह्वृचपरिशिष्टे॥ अथास्मै नाम दद्यात्॥ वेदस्त्वं मासनामाथवा यज्ञो चले इति॥ तथा
संप्रदायविदः॥ तत्त्वंपदार्थयोरैक्यं यस्पदं प्रतिपादयेत्॥ तन्नाम यतके कुर्याद्वाक्यनामतद्विष्यत
इति॥ पूर्वाचार्याणामपि नामकर्त्तव्यं॥ तथा च तत एव॥ यतीनां ख्यातं यशसामाचार्यः पूर्वभाविनां ना १८

म कुर्यान्न शिष्यस्य बुद्धिपूर्वकदाचनेति॥ ततो गुरुः शिष्याय औपनिषदान्परमहंसधर्मानुपदिशे
त्॥ ननु परमहंसानां त्यक्तसर्वकर्मणां कथं धर्मेष्वधिकारः॥ उच्यते॥ यज्ञादिसर्वकर्माणां परित्या
गे विविदुषणा स्वाश्रमोचित ब्रह्मचर्यापरिग्रहश्रवणप्रणवाभ्याससंध्याध्यानमौनत्रिषवणस्ना
न गुरुशुश्रूषादीनि कर्माणि श्रुतिस्मृतिषु कर्त्तव्यतया प्रतीयंते॥ तत्रारणिश्रुतिः॥ ब्रह्मचर्यमहिंसाचा
परिग्रहं च सत्यं च यत्नेन हे रक्षतो हे रक्षत इति॥ त्रिसंध्यादौ स्नानमाचरेत्॥ संधिं समाधौ वाचरेत्॥
सर्वेषु वेदेष्वारण्यकमावर्त्तयेदुपनिषदमावर्त्तयेदिति॥ औषधवदशनमाचरेदौषधवदशना
माचरेदिति॥ काठकब्राह्मणे॥ स्वस्ति सर्वजीवेभ्य इत्युक्त्वा दीक्षायामुपेयात्काषायवासाः॥ कक्षो
पस्थरोमा लघु मुंडोदरपात्रो कस्मादित्यध्यात्ममस्य ध्यानेन ऊर्ध्वगो वायुर्विमुक्तमार्गो भवेदनिके
तश्चरेत्॥ भिक्षाशीनन धाप्लवके धारयेदित्यादि॥ बृहदारण्यके॥ तस्मादेवंविच्छांतो दांत उपर

तस्तीतिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत् तस्सर्वमात्मानं पश्यति॥ आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मं
तव्यो निदिध्यासितव्यः॥ तस्मात् ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पांडित्यं च निर्विद्या
थ मुनिः मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मण इति॥ अयमर्थः॥ यस्मात् सर्वे ब्राह्मणा एतमात्मानमसा
धनमफलस्वभावं विदित्वा सर्वस्मात् साधनफलस्वरूपादेषणालक्षणाद्व्युत्थाय भिक्षाचर्यां चरंति स्म
दृष्टादृष्टार्थकर्म तत्साधनं च हित्वा तस्मादद्यात्वपि ब्रह्मविद्ब्राह्मणः पांडित्यं पंडितभावमेतदात्मविज्ञानं
पांडित्यं निर्विद्य निःशेषं कृत्वा आत्मज्ञाननिरवशेषं कृत्वेत्यर्थः॥ आचार्यत आगमतश्च वेदांततात्पर्या
वधारणं श्रवणं एषणाभ्यो व्युत्थाय कुर्यादित्यर्थः॥ एषणा मतीरस्कृत्य नत्वात्मविषयस्य पांडित्यस्यो
द्भव इति॥ तस्मादेषणाभ्यो व्युत्थाय ज्ञानभावेन बाल्येन तिष्ठासेत् स्थातुमिच्छेत्॥ साधनफलाश्रयणं
हि बलमितरेषामनात्मविदां॥ तत् बलं हित्वा विद्वान् साधनफलस्वरूपात्मविज्ञानमेव बलं तद्भाव

म्य दक्षिणं जानु निभूमं नीत्वा पादग्रहणं कृत्वा यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति
तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये॥ इति मंत्रेण गुरुं भगवत्बुध्योपसृत्य अधि
हि भगवो ब्रह्मेति ब्रूयात्॥ तस्मै साधनचतुष्टयसंपन्नाय तथा च परिशिष्टे॥ अथ गुरुमुप
गम्य दक्षिणं जान्वाच्य पाद उपसंगृह्याह अधीहि भगवो ब्रह्मेति तित्तस्मै साधनचतुष्टयसंपन्ना
याधिकारिणे गुरुर्ब्रह्मोपदिशेत्॥ तथा च मुंडके॥ तस्मै स विद्वानुपसन्नाय सम्यक् प्रशांतचित्ताय श
मान्विताय॥ येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यां तदेतत्सत्यमिति॥ ततो गुरुरद्वैतं
सच्चिदानंदस्वरूपमात्मानं अनुसंधाय जलं पूर्णशंखं पुष्पादिभिरभ्यर्च्य तेनोदकेन प्रणवेन शि
ष्यस्य शिरोभिषिंचेत्॥ ततः शन्नो मित्र इति शांतिं पठित्वा शिष्यस्य शिरसि हस्तं दत्वा पुरुषसूक्तं ज
पेत्॥ तथा च बह्वृचपरिशिष्टे॥ अथास्य शिरसि पुरुषसूक्तेन पाणिमुपदधाति॥ मम व्रते ते हृदयं

संन्यस्यतियोवाव्यक्तलिष्ठति किंतस्ययज्ञोपवीतं कास्यशिखा कथंतस्योपस्पर्शनमिति॥तान्होवा
चाइदमेवास्यतयज्ञोपवीतंयद्यात्मध्यानंविद्याशिखानिधारैःसर्वत्रावस्थितैःकार्यंनिर्वर्तयन्नुदपा
त्रेजलतीरेनिकेतनइति॥आपस्तंबः॥सर्वतःपरिमोक्षमेकेसत्यानृतेसुखदुःखेवेदान्निमंच
लोकंपरित्यज्यात्मानमन्विच्छेत्बुद्धेमोक्षेमप्रापणमिति॥भिक्षात्रीसर्ववर्णेषु अभिशस्तपतितव
र्ज्यं॥अयज्ञोपवीतीशौचनिष्ठःक्षमीलुब्धनिंदास्तुतिसमोभूतेषुमौनीगूढधर्माश्रितोनित्यंध्या
नयोगपरः॥स्थिरधीरात्मरतिरात्मतृप्तआत्मनिष्ठआत्मनाब्रह्मनयत्यात्मात्मब्रह्मविद्याप्नोती.
तिविज्ञायते॥एवंब्रह्मनिष्ठपरिव्राड्ब्रह्माप्नोति॥याज्ञवल्क्यः॥सत्यमस्तेयमक्रोधःह्रीःशौ
चंधीर्धृतिर्दमः॥संयतेंद्रियताविद्याधर्मःसर्वउदाहृतः॥सत्यंयथार्थवचनं॥अस्तेयंपरद्रव्या
नपहारः॥अक्रोधोपकारिण्यपिक्रोधस्यानुत्पादनं॥ह्रीर्लज्जाशौचमाहारादिशुद्धिः॥धीःहिताहि 20

तविवेकः॥धृतिरिष्टवियोगानिष्टप्राप्तावप्रचलितचित्तस्ययथापूर्वमवस्थानं॥दमोमदत्यागः॥
संयतेंद्रियता॥अप्रतिसिद्धेष्वपिविषयेष्वनतिप्रसंगः॥विद्याआत्मज्ञानंएतैःसत्यादिभिरनुष्ठि
तैःसर्वैर्धर्मानुष्ठितोभवतीति॥अत्रिः॥कौपीनाच्छादनंवासःकंथांशीतनिवारिणीं॥पादुकेचापि
गृह्णीयात्॥कुर्यान्नान्यस्यसंग्रहं॥यद्विकुरुतेरागादधिकस्यपरिग्रहं॥नरकंरौरवंगत्वाती
र्यग्योनिषुजायते॥कौपीनयुगलंकंथांदंडएकःपरिग्रहः॥एतैःपरमहंसस्यनाधिकंतुविधी
यते॥जीर्णान्यमलान्येवचैलानिग्रंथितानितु॥कृत्वाकंथांबहिर्वासोधारयेद्धातुरंजितं॥
काषायंब्राह्मणस्योक्तंनान्यवर्णस्यकस्यचित्॥मोक्षाश्रमेसदाप्रोक्तंधातुरक्तंतुयोगि
नां॥देवलः॥आददीतप्रदत्तेभ्यःसाधुभ्योधर्मसाधनं॥नाददीतनिवृत्तेभ्यःप्रसादेनापि

किंचन ॥ रथ्यायां बहुवस्त्राणि भिक्षा सर्वत्र लभ्यते ॥ भूमिः शय्या सुविस्तीर्णा यतयः केन दुःखि
ताः ॥ यतिधर्मसमुच्चये ॥ क्षौमं शाणमयं वापि वासः कौक्षेयकौशिकं ॥ अजिनं चापि धर्मज्ञ सा
धुभ्यः स्नानपीडयन् ॥ उपानहं ग्रहीतव्यं कार्पासमयमच्युत ॥ ऊर्णाकारोद्भवं वापि यद्वान्यत्स्याद्दया
चितं ॥ सचैलः स्यादचेलो वा कृत्वाथाप्यावरणोपि च ॥ एकवस्त्रेण वा विप्रो व्रतं भिक्षुश्चरेद्यथा ॥
नात्यंतं सुखदुःखाभ्यां शरीरमुपतापयेत् ॥ स्तूयमानो न तुष्येत निंदितो न शपेत्परान् ॥
वृद्धयाज्ञवल्क्यः ॥ दधिदुग्धे गुरोर्वाक्ये तत्रे च दंतधावने ॥ हविर्ब्राह्मणकाम्येषु पुष्पमूल
फलाशने ॥ नियमातिक्रमो नास्ति ब्राह्मणानामनुज्ञया ॥ अध्यात्मपुस्तकं विप्रैर्दत्तं गृण्हीत
भिक्षुकः ॥ नतावदल्पमादाय लेखयेद्दोषदर्शनात् ॥ अष्टैतान्यव्रतघ्नानि आपो मूलफलं
पयः ॥ हविर्ब्राह्मणकाम्यं च गुरोर्वचनमौषधं ॥ स्नानं त्रिषवणं वं प्रोक्तं नियमास्त्रिदंडि

मेव केवलमाश्रयेत् ॥ तदाश्रयणे नहि करणान्येषणा विषय एनं हत्वा स्थापयितुं नोत्सहंते ॥ ज्ञानबलहीनं
मूढं दृष्ट्वा दृष्टविषयाया मेषणाया मेवैनं करणानि योजयंति ॥ बलं नामात्मविद्यया अशेषविशेषदृष्टि
तिरस्करणं अत एतद्भावेन बाल्येन तिष्ठासेत् ॥ तथात्मना विंदते वीर्यमिति ॥ श्रुत्यंतरात् ॥ नायमात्मा बल
हीनेन लभ्य इति च बाल्यं च पांडित्यं च निर्विद्याथ निःशेषं कृत्वाथ मननान्मुनिर्योगी भवति ॥ एतावद्
द्विब्राह्मणेन कर्तव्यं यदुत सर्वानात्मप्रत्ययतिरस्कारः ॥ एतत्कृत्वा कृतकृत्यो योगी भवति ॥ अमौनं
चात्मानात्मप्रत्ययतिरस्कारौ पांडित्य बाल्यसंज्ञकौ निःशेषं कृत्वा ॥ मौनेनाम्नानात्मप्रत्ययतिरस्करण
स्य पर्यवसानफलं ॥ तच्च निर्विद्याथ ब्राह्मणः कृतकृत्यो भवति ॥ तथा च स्मृतिः ॥ जन्मना जायते शू
द्रः संस्कारेण द्विजोत्तमः ॥ वेदाभ्यासाद्भवेद्विप्रो ब्रह्म जानाति ब्राह्मणः ॥ अथर्वणोपनिषदि च ॥ तमे
वैकं जानाथ आत्मानमन्या वाचो विमुंचथामृतस्यैष सेतुरिति ॥ काठकश्रुतिः ॥ यो वा एवं क्रमेण

सः प्रणवाभ्यासः एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान्॥ सिद्धिमेकस्य संपश्यन्न जहाति न हीयते।
नाभिनंदेति मरणं नाभिनंदेति जीवितं॥ कालमेव परिक्षेत निर्देशं भृतको यथा॥ कपालं वृक्षमूला
नि कुचेलमसहायता॥ समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणं॥ अत्रिः॥ परः परमहंसस्तु
परिव्रज्य श्रुतिशासनात्॥ शांतो दांतश्च सर्वसमः प्रणवाभ्यासतत्परः॥ श्रवणादिरतः शुद्धो निदिध्या
सनतत्परः॥ ब्रह्मभावेन संपश्यन् ब्रह्मांडमखिलं स्थितं॥ आत्मतत्त्वश्च आत्मरतिः समलोष्टाश्मकांच
नः॥ तत्त्वे पदैक्यबोधाच्च विमुक्तः स्वयं सदा॥ अरण्यनिवस्यास्य जितेंद्रियस्य सर्वेंद्रियप्रीतिनिवर्त
कस्य॥ आध्यात्मचिंतागतमानसस्य ध्रुवो ह्यनावृत्तिरुपेक्षकस्य॥ निवसेत्परमो हंसो यत्र क्वापि
कथंचन॥ निर्द्वंद्वो नित्यसत्त्वस्थः सर्वत्र समदर्शनः॥ तुरीयः परमो हंसः साक्षान्नारायणो यतिः॥ प्र
पंचं निखिलं यस्तु ज्ञानाग्नौ जुहुयाद्यतिः॥ आत्मन्यग्नीन् समारोप्य सोऽग्निहोत्री न चेतरः॥ पराश २२

रः॥ तत्र परमहंसानां एकदंडधरः॥ मुंडः अममः अपरिग्रहः॥ अयज्ञोपवीतिनः॥ ज्ञानसिखाज्ञा
ननिष्ठा ज्ञानयज्ञोपवीतिनः ब्रह्मनिष्ठा आत्मरता आत्मतृप्ता आत्मानं सर्वं पश्यंतश्च इति॥ ब्रह्मचर्यमहिं
सां चसस्समस्तेयमार्जवं॥ वेदांतश्रवणं ध्यानं भिक्षोः कर्माणि नित्यशः॥ एकाकी निस्पृहस्तिष्ठेन्न
केनापि सहायता॥ दद्यान्नारायणेत्येवं प्रीतिवाक्यं सदा यतिः॥ बृहस्पतिः॥ आत्यंतिकं ब्रह्मचर्यमा
श्रमत्रयवासिनां॥ स्वदारनियमात्सम्यक् ब्रह्मचारी गृहाश्रमी॥ मेधातिथिः॥ स्मरणं कीर्तनं केलिः
प्रेक्षणं गुह्यभाषणं॥ संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च॥ एतन्मैथुनमष्टांगं प्रवदंति मनी
षिणः॥ विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणं॥ शंखः॥ इष्टानिष्टेषु भोगेषु व्यसनाभ्युदयेषु च॥ उप
शांतो नदद्याचमपि बाणैर्हतो भृशं॥ सत्यवाचमहिंसां च वदेदनपवादिनीं॥ अतिवादांस्तिति
क्षेत अन्तरास्समपैशुनं॥ न चैनं देहमाश्रित्य वैरं कुर्वीत केनचित्॥ क्रुद्ध्यंतं न प्रतिक्रुध्येदा

कुष्टः कुशलं वदेत्॥ जाबालः॥ भक्तानां प्रियकारि स्यात्परद्रोहकर्मधीः॥ नरावज्ञा कृतायेन तेन
देवा वशी कृताः॥ मेधातिथिः॥ भिक्षाटनं जपो ध्यानं स्नानं शौचं सुरार्चनं॥ कर्त्तव्यानि षडेतानि
यतीनां नृपदंडवत्॥ ध्यानं शौचं तथा भिक्षा नित्यमेकांतशीलता॥ भिक्षोः श्चत्वारि कर्माणि पं
चमं नोपपद्यते॥ विष्णुः॥ आचार्येण समुद्दिष्टं लिंगं चैव समाश्रयेत्॥ शौचमाश्रमसंबंधिन्यासि
धर्मांश्च शिक्षयेत्॥ अत्रिः॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ॥ भावशुद्धिर्हरौ भक्तिः सं
तोषः शौचमार्जवं॥ आहारशुद्धिर्वैराग्यमप्रमादो दयानृणं॥ अक्रोधो गुरुशुश्रूषा श्रद्धा शांतिर्द
मः शमः॥ ह्रीस्तपो ज्ञानविज्ञानं योगो लब्धाशनं धृतिः॥ अदिनत्वमनुद्वेगो ब्रह्मधीः समदर्शनं॥
भिक्षाटनं जपो ध्यानं त्यागः कर्मफलस्य च॥ एवं स्वधर्मो विख्यातो यतीनां मुक्तिसिद्धलं॥ अव्युक्षानं
प्रियालापं गुरुवत् प्रतिपूजनं॥ यतीनां वलवृद्धानां स्वीयधर्मानुवर्तिनां कर्तव्यमन्यथा योगीस्व २३

नो॥ न त्वपरमहंसानां मुक्तानामात्मदर्शिनां॥ मौनं योगासनं योगस्तितिक्षैकांतशीलता॥ नि
स्पृहत्वं समत्वं च सप्तैतान्येकदंडिनां॥ अनृशंस्यक्षमासत्यमहिंसादम आर्जवं॥ प्रीतिः प्रसादो
माधुर्यमक्रोधश्च यमा दश॥ विष्णुः॥ कौपिनाच्छादनार्थं च वासोर्द्धस्य परिग्रहं॥ कुर्यात्परमहंस
स्तु दंडमेकं तथैव च॥ पितामहः॥ ग्रासाच्छादना दन्यत्तु गृह्णीयात्कथंचन॥ यावदाहरयेत्ताव
त्प्रतिगृह्णीत नान्यथा॥ मृदमापस्तथान्नं च पत्रपुष्पफलानि च॥ असंवृतानि गृह्णीयात्प्रवृत्तानि
हवीर्यवान्॥ दशव्रताद्यनुष्ठानाद्यतिः कल्याणमश्नुते॥ तेषामेवाननुष्ठानान्नरकं स समश्नु
ते॥ दशव्रतानि सर्वेषां यतीनां विहितानि च॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहाः॥ अक्रो
धो गुरुसुश्रूषा शौचं शुभ्रुक्तिवर्जितं॥ वाङ्मनःकायचेष्टाक्रमप्रमादस्य च वर्जनं॥ मनुः॥ यथो
क्तान्यपि कर्माणि परिहाय द्विजोत्तमः॥ आत्मज्ञाने शमे च स्यात् वेदाभ्यासे च यत्नवान्॥ वेदाभ्या

चिभ्वे

तत्पूर्वं दृष्ट्वा च न स्मरेत् कथाश्च वर्जयेत्तासां न पश्येल्लिखितामपि॥ स्त्रीणामवाच्यदेशस्य क्लिन्ननाडी
व्रणस्य च॥ अभेदेऽपि मनोभेदाज्जनः प्रायेण वंच्यते विष्णुपुराणे॥ शरीरमशेषाणां श्लेष्मादी
नां महाचयः॥ क्व कांतिशोभासौरभ्यकमनीयादयो गुणाः॥ मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थि
संहतौ॥ देहे चेत्प्रीतिमान्मूढो भविता नरकेऽपि सः॥ अग्नेः शीतेन तोयस्य तृषा भक्तस्य च क्षु
धा॥ क्रियते सुखकर्तृत्वं तद्विलोमस्य चेतरैः॥ क्षुत्कृतोपशमं तद्वच्छीताद्युपशमं सुखं॥ मन्य
ते बालबुद्धित्वाद्दुःखमेव हि तत्पुनः॥ करोति हे दैत्यपुत्रा यावन्मात्रं परिग्रहं॥ तावन्मात्रं स एवा
स्य दुःखं चेतसि यच्छति॥ तथा गीतासु॥ अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवं॥ आचार्योपास
नं शौचं स्थैर्यमात्मविनिग्रहः॥ इंद्रियार्थेषु वैराग्यमनहंकार एव च॥ जन्ममृत्युजराव्याधिदुःखदो
षानुदर्शनं॥ असक्तिरनभिष्वंगः पुत्रदारगृहादिषु॥ नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥ २८

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी॥ विविक्तदेशसेवित्वमरतिर्जनसंसदि॥ अध्यात्मज्ञान
नित्यत्वं तत्त्वज्ञानार्थदर्शनं॥ एतत् ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥ असक्तबुद्धिः सर्वत्र जिता
त्मा विगतस्पृहः॥ नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति॥ बुद्ध्या विशुद्धया युक्तो धृत्यात्मान
नियम्य च॥ शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥ विविक्तसेवी लघ्वाशी यतवाक्काय
मानसः॥ ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥ अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं॥ वि
मुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते॥ ब्रह्मभूतप्रशांतात्मा न शोचति न कांक्षति॥ समः सर्वेषु
भूतेषु मद्भक्तिं लभते परां॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः॥ ततो मां तत्त्वतो ज्ञा
त्वा विशते तदनंतरं॥ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च॥ निर्ममो निरहंकारः समदुःखसुख
क्षमी॥ संतुष्टः सततं योगी यतात्मा दृढनिश्चयः॥ मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥ य

त्रिश्चे स्मान्नो द्विजते लोको लोकान्नो द्विजते च यः ॥ हर्षामर्षभयोद्वेगै मुक्तो यः स च मे प्रियः ॥ अनपेक्षः
शुचिर्दक्षः उदासीनो गतव्यथः ॥ सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः ॥ समः शत्रौ च मित्रे च
तथा मानापमानयोः ॥ शीतोष्णसुखदुःखेषु समः संगविवर्जितः ॥ तुल्यनिंदास्तुतिर्मौनी संतुष्टो
२५ येन केन चित् ॥ अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ ये तु धर्म्यामृतमिदं यथोक्तं पर्युपा
सते ॥ श्रद्दधाना मत्परमा भक्तास्तेतीव मे प्रियाः ॥ तथा भागवते ॥ अमृतश्चैव मत्यश्च द्वयं देहे
प्रतिष्ठितं ॥ मषेण साध्यते मत्युः सत्येन साध्यते मृतं ॥ न यज्ञफलदानानि नियमस्तारयंति हि ॥
यथा सत्यं परं लोके पुरुषं पुरुषर्षभ ॥ अश्वमेधसहस्रं च सत्यं च तुलया धृतं ॥ अश्वमेध
सहस्राद्धि सत्यमेव विशिष्यते ॥ आयुस्तेजो बलं वीर्यं प्रज्ञा श्रीश्च महद्यशः ॥ पुण्यं च मत्
प्रियत्वं च लभते ब्रह्मचर्यया ॥ असत्यमपि वक्तव्यं गोब्राह्मणहिताय वै ॥ सत्यादपि हित

धर्मात्स च्युतो भवेत् ॥ स्वधर्मरतानू यतीन् वृद्धान् देवांश्च प्रणमेद्यतिः ॥ नान्यमाश्रमिणं केचित्प्रशस्त
मपि तं न मेत् ॥ अपि शास्त्रसमायुक्तं सदाचारसमन्वितं ॥ साधुव्रतं गृहस्थाढ्यं न नमस्येत्कचिद्य
तिः ॥ जाबालः ॥ अजिह्वः षंढकः पंगुरंधो बधिर एव च ॥ मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न संश
यः ॥ इदमिष्टमिदं नेति योश्नन्नपि न सज्जते ॥ हितं सत्यं मितं वक्ति तमजिह्वं प्रचक्षते ॥ सद्योजातां
यथा नारीं तथा षोडशवार्षिकीं ॥ शतवर्षां च यो दृष्ट्वा निर्विकारः स षंढकः ॥ भिक्षार्थमटनं यस्य वि
ण्मूत्रकरणाय च ॥ योजनान्न परं याति सर्वथा पंगुरेव सः ॥ तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगं ॥
चतुर्युगां भुवं मुक्त्वा परिव्राट् सोंध उच्यते ॥ हितं मितं मनोरामं वचः शोकापहं च यत् ॥ श्रुत्वा यो
न शृणुते बधिरः परिकीर्त्तितः ॥ सान्निध्ये विषयाणां च समर्थो विकलेंद्रियः ॥ स्वप्नवद्वर्त्तते नि
त्यं भिक्षुर्मुग्धः स उच्यते ॥ न निंदां न स्तुतिं कुर्यान्न किंचिन्मर्मणि स्पृशेत् ॥ न संभवे स्त्रियं काश्चि

थं तपस्तीर्थं तीर्थमिंद्रियनिग्रहः॥ सर्वभूतदयातीर्थं ध्यानं तीर्थमनुत्तमं॥ एतानि पंच तीर्थानि
षष्ठं सत्यं प्रकीर्तितं॥ देहे तिष्ठंति सर्वस्य तेषु स्नानं समाचरेत्॥ न तथा पुष्करे स्नात्वा गंगायां कुरु
२६ जांगले॥ मुच्यते पुरुषः पापाद्यथा स्नातो क्षमादिषु॥ निगृहीतेंद्रियग्रामो यत्र यत्र वसेन्नरः॥
तत्र तत्र कुरुक्षेत्रं निमिषं पुष्कराणि च॥ इदं तीर्थमिदं नेति ये नरा भेददर्शिनः तेषां विधियते तीर्थगमनं
तत्फलानि च सर्वं ब्रह्मेति यो वेत्ति न तीर्थं तस्य किंचन॥ जाग्रत्स्वप्नसुषुप्तेषु ब्रह्मण्येव सक्तते॥ स्नानं मनोमलत्यागो दानं चा
भयदक्षिणा॥ ज्ञानं तत्त्वार्थसंबोधो ध्यानं निर्विषयं मनः॥ मनसश्चेंद्रियाणां च ह्यैकाग्र्यं परमं तपः॥ तज्ज्यायः सर्वधर्मेभ्यः स ध
र्मपर उच्यते॥ भगवद्गीतासु॥ संकल्पप्रभवान् कामान् त्यक्त्वा सर्वानशेषतः॥ मनसैवेंद्रियग्रामं विनियम्य समंततः॥
शनैःशनैरुपरमेत् बुध्या धृतिगृहीतया॥ आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत्॥ यतो यतो निश्चरति मनश्चंचल
मस्थिरं॥ ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥ योगशास्त्रे च॥ वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि॥ एकीकृत्य विमु
च्यते योगोयं मुख्य उच्यते॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यं तपः परं॥ क्षमा दया च संतोषो व्रतान्यस्य विशेषतः॥ वायुपुराणे॥ २६

आहारशुद्धिर्विनयः शौचं मत्प्रीतिकर्म च॥ सम्यक्दर्शनमित्येवं पंचैवोपव्रतानि च॥ यतिधर्मसमुच्चये॥ सर्वतीर्थेषु यत्पुण्यं यद्दानं
सर्वतीर्थेषु यत्फलं॥ सर्वदानफलं वापि तन्न तुल्यमहिंसया॥ सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियं॥ प्रियं च नानृतं ब्रूयादेष
धर्मः सनातनः॥ असत्यमपि वक्तव्यं गोब्राह्मणहिताय वै॥२५ परमापद्गतेनापि न कार्यं स्तेयमल्पकं॥ स्तेयादभ्यधिकः कश्चिन्ना
स्त्यधर्म इति स्मृतः॥ वायुपुराणे॥ द्वेषमूलं भयं तस्मात् द्वेषाभावे भयं कुतः॥ द्वेषस्य रागमूलत्वात् ब्रह्मचर्यं च नाशयेत्॥ ब्र
ह्मचर्यात् ब्राह्मणस्य ब्राह्मणत्वं विधीयते॥ एवमाहुः परे लोके ब्रह्मचर्यविदो जनाः॥ ब्रह्मचर्ये स्थितं धर्मं ब्रह्मचर्ये
स्थितं तपः॥ ये स्थिता ब्रह्मचर्येण ब्राह्मणास्ते दिवि स्थिताः॥ व्यासः गुरुमूलाः क्रियाः सर्वा भुक्तिमुक्तिफलप्रदाः॥ त
स्मात्सेव्यो गुरुर्नित्यं युक्तार्थः सुसमाहितः॥ न कुर्यान्नियमारंभमनिवेद्य स्वकं गुरुं॥ छायाभूतो यथा नित्यमेव वसेद्गुरौ
श्रद्धया परया युक्तः सदा हृद्दशसंध्ययोः॥ दंडप्रणामान् कुर्वीत देवतागुरुसन्निधौ॥ नातिक्रमेत मर्यादां गुरुणा या प्रकीर्तिता॥
गुरुशुश्रूषणं नाम धर्मो ज्येष्ठः प्रकीर्तितः॥ गुरोर्नैवाप्रियं कुर्यात्पीडितः पीडितोपि वा॥ नावमान्येत तद्वाक्यं नावमानं समाचरेत्॥
आचार्यस्य प्रियं कुर्यात्प्राणैरपि धनैरपि॥ कर्मणा मनसा वाचा स याति परमां गतिं॥ आचार्यं मां विजानीयान्नावमन्येत क

विश्वे

२८ हिचित्॥नमर्त्यबुध्यास्त्रयेतसर्वदेवमयोगुरुः॥मनुः॥गुरोर्यत्रपरिवादोनिंदोवापिप्रवर्तते॥कर्णौतत्रपिधातव्यौगंतव्यंवाततोन्य
तः॥गुरोश्चक्षुर्विषयेनयथेष्टासनोभवेत्॥नदेशोनचकालोस्तीनाहिसागुरुकर्मसु॥सर्वत्रैवानुकूलस्यादेतावाधर्मसंग्रहः॥नो
दाहरेदस्यनामपरोक्षमपिकेवलं॥नैवचास्यानुकुर्वीतगतभाषणचेष्टितं॥आपस्तंबः॥देवमिवआचार्यमुपासीतेति॥मन्वाद्यु
क्तोब्रह्मचारीधर्मोयतिभिरपिकर्तव्याः॥ब्रह्मचारिणियेधर्मागुरुशुश्रूषणादयः॥तेसर्वेपियतीनांस्युःस्त्रीणांभैक्षविवर्जि
र्जितः॥बहूचपरिशिष्टादेशात्॥मनुः॥आस्यतामितिचोक्तःसन्नासीताभिमुखंगुरोः॥हीनान्नवस्त्रवेषःस्यात्सर्वदा
गुरुसन्निधौ॥उत्तिष्ठेत्प्रथमंचास्यचरमंचैवसंविशेत्॥प्रतिश्रवणसंभाषेछयानोनसमाचरेत्॥नासीनोनचभुंजानो
नतिष्ठन्नपराङ्मुखः॥आसीनस्यस्थितःकुर्यादभिगच्छंस्तुतिष्ठतः॥नासीनोनासनस्थोवानित्यंस्याद्गुरुसन्निधौ॥त
था॥गुरोर्गुरौसंनिहितेगुरुवद्वृत्तिमाचरेत्॥नचातिसृष्टोगुरुणांतान्गुरूनभिवादयेत्॥विद्यागुरुष्वेवमेवनित्यावृत्तिः
स्वयोनिषु॥श्रेयस्सुगुरुवद्वृत्तिंनित्यमेवसमाचरेत्॥अपस्तंबः॥आकूताध्यायीस्यात्सदा॥निशायांगुरुसंनिशेत्॥तस्य
पादौसंप्रक्षाल्यसंबाह्यानुज्ञातःसंविशेत्॥मनु॥अल्पानामप्यवहारेणरहस्यानासनेनच॥हीयमाणानिविषयैरिंद्रि राम २७

त्सत्यंनसत्यंसत्यमुच्यते॥बहिर्मर्मतियःकश्चित्त्यक्त्वादेहस्थमीश्वरं॥स्वचम्हेपायसंत्य
क्त्वाभिक्षामटतिदुर्मतिः॥व्यासः॥यच्चकामसुखंलोकेयच्चदिव्यमहत्सुखं॥तृष्णाक्षयसु
खस्यैतेनार्हतःषोडशींकलां॥नसुखंदेवराजस्यनसुखंचक्रवर्तिनः॥यादृशंवीतरागस्यमु
नेरेकांतवासिनः॥गर्भव्याधौश्मशानेचपुराणेजायतेमतिः॥सैवचेत्सर्वदातिष्ठेत्कोनमुच्येत
तबंधनात्॥प्राणायथात्मनोभिष्टाभूतानामपितेतथा॥आत्मौपम्येनसर्वत्रदयांकुर्वीत
मानवः॥अपकारिणिकोपश्चेत्कोपेकोपःकथंनते॥धर्मार्थकाममोक्षाणांप्रसह्यपरिपंथिनि॥
शोकोनाशयतिप्रज्ञांशोकोनाशनाशयतिश्रुतं॥धृतिंचनाशयेच्छोकोनास्तिशोकसमोरिपुः॥
रागांधोहिजनःसर्वोनपश्यतिहिताहितं॥रागंतस्मान्नकुर्वीतयदिच्छेदात्मनोहितं॥क्षमातो

×आत्मन्येव स्थितः स्वस्थ

सन्यासप वर्णाश्रमविवर्जितः ॥ तं दृष्ट्वा शाम्यमनसः स्पृहयंति दिवोकसः ॥ वर्णाश्रमाणां धर्मो हि देवस्थानेषु कारणं लिंगाभावात्तु कैवल्यमिति ब्रह्मानु विश्वेश्वरी
प्रीति शासनं ॥ मोक्षधर्मेषु निरतो लब्ध्वाहारो जितेंद्रियः ॥ संप्राप्नो ब्रह्मणः स्थानं यत्परं प्रकृते ध्रुवं ॥ वीततृष्णो निरानंदो निराशो निःपरि
ग्रहं ॥ सर्वतः सुखमप्यन्ये तितजला नाम महोदधिं ॥ नात्यक्त्वा सुखमाप्नोति नात्यक्त्वा विंदते परं ॥ नात्यक्त्वा निर्भयः शेते सर्वं त्यक्त्वा सु
खी भवेत् ॥ आत्मचिंताविनोदेन शौचक्रीडनच ॥ सर्वभूतसमत्वेन योग्यः सिद्ध्यति नान्यथा ॥ आत्मानंदश्च आत्ममात्मन्येव
समाहितः ॥ रतश्चैव स्वतत्त्वश्च संतुष्टो नान्यमानसः योगः सिध्यति नान्यथा ॥ स्वप्ने [illegible] यो हि युक्तस्या जाग्रती वविशेषतः ॥ चि
ईदृक्चेष्टः स्मृतः श्रेष्ठो वरिष्ठो ब्रह्मवादिनां ॥ पराशरः ॥ संदिग्धं सर्वभूतानां वर्णाश्रमविवर्जितं ॥ तं दृष्ट्वा शांतमनसं स्पृहयंति दिवो
कसः ॥ नाध्येतव्यं न वक्तव्यं न श्रोतव्यं न कदाचन ॥ एभिर्गुणैश्च संपन्नो यतिर्भवति नेतरः ॥ शंख ॥ पर्यटनशीलः स्यादात्मज्ञा
नार्थं तदवाप्याध्वनेक स्थानरतिः सदाभ्यासपरो नैकदेशमुत्रपुरीषे चेति ॥ पौराणिकाः ॥ नैव धर्मी न चाधर्मी न चैव हि शुभा
शुभी ॥ भैक्षाशी सर्ववर्णेषु तुल्यनिंदात्मस्तुतिः क्षमी ॥ निस्तरंगवदंभोधिः स्थिरधीः सर्वदात्मवान् ॥ समः सर्वेषु भूतेषु परहंसः
स उच्यते ॥ कण्वायनः ॥ तत्र परमहंसो नामैकदंडधराः मुंडास्तथा कौपीनवाससः ॥ अव्यक्तलिंगा अव्यक्ताचारा
अनुन्मत्ता उन्मत्तवदाचरंतः शिखायज्ञोपवीतत्रिदंडकमंडलुकपालानां च त्यागिनः ॥ शून्यागारदेवगृहवासिनो न ते

इति
विश्वेश्वरसंन्यास-
पध्दतिः
107/5

विश्वेश्वरसरस्वतीप्रणीता

याणिनिवर्तयेत्॥ इंद्रियाणांनिरोधेनरागद्वेषक्षयेनच॥ अहिंसायचभूतानाममृतत्वायकल्पते॥ अवेक्षेतगतिंन्टणांकर्मदोषसमुद्भवा॥
निरयेचैवपतनंयातनाश्चयमक्षये॥ विप्रयोगंप्रियैश्चैवसंप्रयोगंतथाप्रियैः॥ जरयाचाभिभवनंव्याधिभिश्चापिपीडनं॥ देहा
दुत्क्रमणंचास्मात्पुनर्गर्भेचसंभवनं॥ योनिकोटिसहस्रेषुसृतीश्चास्यांतरात्मनः॥ अधर्मप्रभवंचैवदुःखयोगंशरीरिणां॥ ध
र्मार्थप्रभवंचापिसुखसंयोगमक्षयमेवच॥ सूक्ष्मतांचान्ववेक्षेतयोगेनपरमात्मनः॥ देहेषुचैवोपपत्तिरुत्तमेष्वधमेषुच॥ दूषितो
पिचरेधर्मंयत्रतत्राश्रमेरतः॥ समःसर्वेषुभूतेषुनलिंगंधर्मकारणं॥ आश्रमलिंगेदंडादिभिर्दूषितोयुक्तः॥ अपित्रादे
तेहीनोपिजीवपरमात्मनोरेकत्वानुसंधानलक्षणंधर्मंचरेत्॥ तथाचयाज्ञवल्क्यः॥ अयंतुपरमोधर्मोयद्योगेनात्म
दर्शनं॥ पुनरपिकिंविशिष्टचरेदित्याह॥ यत्रेत्यादि॥ यत्रक्वाश्रमे आत्मदर्शनविरोधभूतकर्मतत्साधनोपवीतादि
लिंगंनास्तितत्रपरमहंसस्तोरतस्तात्पर्येणावस्थितःसन्निति॥ व्यासः॥ लिंगेसत्यपिखल्वस्मिन्ज्ञानमेवहि
कारणं॥ निर्मोक्षायेहभूतानांलिंगग्रामोहिनिरर्थकः॥ तस्मादलिंगोधर्मज्ञोब्रह्मब्रह्मण्योनुव्रतः॥ लिंगाभावानु
कैवल्यमितिहिश्रुतिशासनं॥ पितामहः॥ गुढधर्माश्रितोविद्वानज्ञातचरितंचरेत्॥ संदिग्धःसर्वभूतानां

शब्दार्थचिंतनाभ्यासात्स उक्तो मानसो जपः ॥ पाद्मे । परहंसव्रतिनस्तु प्रणवाभ्यासशालिनः ॥ यद्यनुसन्धविज्ञानो विरक्तः संयतेंद्रियः ॥
यावज्जीवं जपेन्मंत्रं प्रणवं ब्रह्मणो वपुः ॥ कृत्स्नो दहति पापानि दीर्घो मोक्षप्रदायकः ॥ प्लुतस्तु सर्वसिद्ध्यै स्यात्प्रणवस्त्रिविधः स्मृतः ॥ अकारो ऋग्वे
द उ यजुर्वेदः मकारः सामसंज्ञकः ॥ काठके । सर्वे वेदा यत्पदमामनंति ॥ तपांसि सर्वाणि च यद्वदंति ॥ यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं
संग्रहेण ब्रवीम्योमित्येतत् । एतदालंबनं श्रेष्ठमेतदालंबनं परं ॥ एतदालंबनं ज्ञात्वा ब्रह्मलोके महीयते ॥ यस्तु द्वादशसाहस्रं नि
त्यं प्रणवमभ्यसेत् ॥ तस्य द्वादशभिर्मासैः परं ब्रह्म प्रकाशते ॥ अथ श्रवणविधिः ॥ तत्रैवं मितिकर्तव्यता ॥ कूर्मपुराणे ॥ आचम्य संय
तो नित्यमधीयीत उदङ्मुखः ॥ उपसंगृह्य तत्पादौ वीक्ष्यमाणो गुरोर्मुखं ॥ मनुः हस्तौ तु संयतौ कार्यौ जानुभ्यामुपरिस्थितौ ॥
संहत्य हस्तावध्येयं स हि ब्रह्मांजलिः स्मृतः ॥ ब्राह्मणः प्रणवं कुर्यादंते च वेदविद्द्विजः ॥ इति चकारादादावपि प्रणवं कुर्यादित्यर्थः ॥
श्रवत्यनोंकृतं पूर्वं पुरस्तादवशीर्यते ॥ इति वचनाच्च प्रणवमुच्चार्य सुमुखश्चैकदंतश्चेत्यादिना विघ्नराजं स्मृत्वा ॥ शं नो मित्र इ
त्यादि शांतिं पठित्वा वेदांतग्रंथस्य संध्यारस्थले पठेत् ॥ तथा चोक्तं संप्रदायविद्भिः ॥ तथा चोपदिष्टो गुरुणा सह शांतिं पठेत्ततः ॥
संध्यापात्रं समादाय गुरुवक्त्रं विलोकयेत् ॥ स्थित्वा ते नोमि॰ तिम्रोक्तो स्वयमप्योमिति ब्रुवन् ॥ मंदस्वरेण संध्यस्थवाक्यमेकं

पठेत्ततः ॥ गुरुणा तस्य संक्षिप्य तात्पर्ये वर्णिते सति ॥ ततो द्वादशवारं तु प्रणामान्कुर्यात् ॥ तथा चाहुः ॥ वेदांतशास्त्रस्यारंभे प्रणामा द्वादश स्मृ
ताः ॥ गुरोर्यथा वदंते षट् प्रणामाः प्रकीर्तिताः ॥ ततो यथाशक्ति पठित्वांते पुनः प्रणवं कृत्वा तामेव शांतिं पठित्वा नमस्कारान्विधाय प्रणमे
त् ॥ किं तीर्थैः किं प्रदानैर्वा किं यज्ञैः किमुपोषितैः ॥ अहन्यहनि लं देवं तन्मयत्वेन शृण्वतां ॥ अत्रात्मव्यतिरेकेण द्वितीयं यदि पश्यति ॥
ततः शास्त्राण्यधीयंते श्रूयंते ग्रंथविस्तराः ॥ श्रवणान्मननाद्ध्यानान्निदिध्यासनतस्तथा ॥ आराध्यं सर्वदा ब्रह्म पुरुषेण हितैषिणा ॥
यथा खनन्खनित्रेण नरो वार्यधिगच्छति ॥ तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥ गुरुपूजा च सततं कृशानोप्युपासनं ॥ श्रवणं
चैव शास्त्राणां कूटस्थश्रेय उच्यते ॥ अध्यात्मिकीं कथामुक्त्वा श्रेष्ठचर्यां सुरस्तुतिं ॥ अनुग्रहं पथि प्रश्नं तथा जात्मोप्युच्यते ॥ ब्रह्म
चर्यमनालस्यमहिंसा सत्यमार्जवं ॥ वेदांतश्रवणं ध्यानं शिष्यो कार्याणि नित्यशः ॥ त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणां ॥ श्रु
त्या विधीयते यस्मात्तत्त्यागी पतितो भवेत् ॥ शिखासूत्रपरित्यागी वेदांतश्रवणं विना ॥ विद्यमानेपि संन्यासे पतत्येव न संशयः ॥
अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढो भवेत् ॥ शमादिसहितस्तावदभ्यसेच्छ्रवणादिकं ॥ यावदेवात्मविज्ञानं मेलदाभासवर्जितं ॥
सुनिश्चलं भवेत्तावच्छ्रवणादिरतो भवेत् ॥ स्वकार्यशेषक्रियया श्रवैव संहारं प्रजहाति सः ॥ जिज्ञासोरेव चैकात्म्यत्रय्यंतेष्वधिकारि
ता ॥ शांतेरनन्यमतिभिर्मधुरस्वभावैरेकत्वनिश्चितमनोभिरपेतमोहैः ॥ साकं वनेन परमात्मपदं स्वरूपं शास्त्रेषु सम्यग

निशां विमृशंति धीराः ॥ न देशो न च कालोस्ति न हिंसा गुरुकर्मणि ॥ सर्वत्रैवानुकूलः स्याद्देषः स धर्मस्य संग्रहः ॥ व्यासः यस्य देवे परा भक्तिर्य
था देवे तथा गुरौ ॥ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः ॥ याज्ञवल्क्यः ॥ ज्ञेयं चारण्यकमहं यदादित्यादवाप्तवान् ॥ योगशास्त्रं
च मत्प्रोक्तं ज्ञेयं योगमभीप्सता ॥ चित्तवृत्तेर्विषयांतरात्तिरस्कारेणात्मनि स्थैर्यं योगः ॥ तस्यास्यार्थं मया बृहदारण्यकाख्यमादित्या
६ त्प्राप्तं तज्ज्ञातव्यं ॥ तथा योगशास्त्रं तदपि ज्ञातव्यं ॥ अनन्यविषयं कृत्वा मनोबुद्धिस्मृतींद्रियं ॥ ध्येय आत्मा स्थितो योसौ हृदये दी
पवद्विभुः ॥ संवर्तः ॥ योगाभ्यासपरो नित्यमात्मविद्यापरायणः ॥ सर्वाश्रमैर्विजिज्ञास्यः समस्तैरेवमेव तु ॥ द्रष्टव्यस्त्वथमंतव्यः
श्रोतव्यश्च द्विजातिभिः ॥ द्रष्टव्योत्रापरोक्षीकर्तव्यो आत्मा तत्रोपायं दर्शयति ॥ श्रोतव्य इति प्रथमतो वेदांतश्रवणेन निर्णेतव्य
स्तदनंतरं मंतव्यो युक्तिभिर्विचारितव्यः ॥ ततोसौ ध्यानेनापरोक्षीभवति ॥ अमनने दोषमाह ॥ तैत्तिरीयास्मृतिः ॥ तत्त्वेव भयं
विदुषो अमन्वानस्येति ॥ स्कांदे ॥ वेदमेवं पुण्यमारुणाय आयुरारोग्यपुष्टिदं ॥ पठतो शृण्वतो वापि सर्वपापं व्यपोहति ॥ गीतासु
तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ॥ उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ व्याससूत्रं ॥ आवृत्तिरसकृदुपदेशात् ॥ त
था चान्यत्र ॥ श्रवणादिक्रिया तावत्कर्तव्येह प्रयत्नतः ॥ यावद्यथोक्तविज्ञानमाविर्भवति भास्वरं ॥ इति सुरेश्वरवचनेभ्यो
वेदांतश्रवणमनननिदिध्यासनां ब्रह्मसाक्षात्कारोदयपर्यंतमावृत्तिः कार्या ॥ काठकवचनाच्च ॥ उत्तिष्ठत जाग्रत प्रा

अथः- "विश्वेश्वरीपद्धतिः"

अथ जपविधिः ॥ योगयाज्ञवल्क्यः ॥ उपांशुजपयोगस्तु तस्माच्छतगुणो भवेत् ॥ सहस्रो मानसः प्रोक्तो यस्माद्ध्यानसमो हि सः ॥ तस्माद्वा
१०७/५ चिकात् ॥ न चक्रमन्नाहसन्न पार्श्वमवलोकयन् ॥ नापाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा ॥ कौर्मे तु ॥ जपकाले न भाषेत नान्या 107/5
नि प्रोक्षयेद्बुधः ॥ न कंपयेच्छिरो ग्रीवां दंतान्नैव प्रकाशयेत् ॥ व्यासः ॥ अंगुल्यग्रेषु यज्जप्तं यज्जप्तं मेरुलंघने ॥ असंख्यातं च यत्
जप्तं तत्सर्वं निष्फलं भवेत् ॥ अनामिकायां मध्ये च मध्यांगाधः क्रमेण तु ॥ तर्जन्या विजयांते च अक्षमाला करे स्थिता ॥ मध्य
मादिद्वयं वर्ज्यं जपकाले विपश्चिता ॥ एतन्मेरुं विजानीयाद्दूषितं ब्रह्मणा स्वयं ॥ शिवपुराणे ॥ अंगुल्या जपसंख्यानमेकमेव मुदा
हृतं ॥ रेखयाष्टगुणं विद्यात्पुत्रजीवैर्दशाधिकं ॥ शतं स्याच्छंखमणिभिः प्रवालैस्तु सहस्रकं ॥ स्फटिकैर्दशसाहस्रं मौक्तिकैर्लक्ष
मुच्यते ॥ पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते ॥ कुशग्रंथ्या च रुद्राक्षैरनंतगुणितं भवेत् ॥ वराहे अक्षमालायाः परिमाणमुक्तं
अष्टोत्तरशतं पूर्णं पंचाशद्भिश्च मध्यमा ॥ कनिष्ठः पंचविंशत्या परिमाणं विधीयते ॥ बोधायनः ॥ वृक्षमूलिको वेदः संन्या
सी वेदो वृक्षः प्रणवस्तस्य मूलं प्रणवात्मको वेदः प्रणवं ध्यायन् प्रणवो ब्रह्मभूयाय कल्पत इति होवाच प्रजापतिरिति ॥ वैवस्वतः
पादमाक्रम्य पादेन जपं नैव तु कारयेत् ॥ शिरः प्रावृत्य वस्त्रेण ध्यानं नैव प्रशस्यते ॥ ॐ हरेर्हृत्सरश्रेण्यां वर्णाद्वर्णपदात्पदं ॥

ध्यायये

शिमाप्नुयात्॥ क्रतुः॥ संप्रार्थितमुपस्थानादसंक्लृप्तमयाचितं॥ तस्मादेकान्नमप्यद्याद्भैक्षं माधूकराह्वयं॥ अयाचितं यल्लभ्यं भोजनाच्छादनं भवे
त्॥ निमंत्रितोथवाश्नीयात्स्वगुणं न प्रकाशयेत्॥ पराशरः॥ यतीनामातुराणां तु दृष्ट्वा नांदीं घरोगिणां॥ एकान्नेन न दोषोस्ति एकस्यैवाह्नि
दिने॥ क्रतुः॥ सुजीर्णो विकृशो रोगी दशांतो विकलेंद्रियः॥ पुत्रमित्रगुरुभ्रातृपत्नीभ्यो भैक्षमाहरेत्॥ एतत्स्वयं यतिविषयं मनुः॥ जी
विताल्ययमापन्नो योन्नमत्ति इतस्ततः॥ लिप्यते न स पापेन पद्मपत्रमिवांभसा॥ नापो मूत्रपुरीषाभ्यां नाग्निर्दहनकर्मणा॥ न वायुः स्पर्श
दोषेण नान्नदोषेण मस्करी॥ परमहंसस्य तु विशेषमाह॥ पितामहः॥ अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया॥ औषधीतस्यदाभोज्यं ग्रा
समाश्रयेत्॥ वृहदारण्यके॥ अथ भिक्षाचर्यं चरंतीति॥ अभ्यन्निक्षन्दुप्येतदुप्यतेनुपरिग्रहात्॥ माधूकरमथैकान्नं परमहंसः
समाश्रयेत्॥ वृहदारण्यके॥ अथ भिक्षाचर्यं चरंतीति॥ मैत्रायणीश्रुतिः त्रीन्वेणवान्दंडान्दक्षिणे पाणौ धारयेत्॥ एकं वा यद्य
कृतदासशिखं वपनं कृत्वा विसृज्य यज्ञोपवीतं च त्रिषु वर्णेष्वेकागारे भैक्षमश्नीयात् माधूकरीं चेति॥ काठकब्राह्मणे॥ चतुर्षु वर्णे
षु भैक्षं चरेत्पाणिपात्रेणाशनं कुर्यात् दोषधवत्प्राश्नीयात्प्राणसंधारणार्थं यथा मेदो वृद्धिर्न जायते इत्यादि मैत्रायणिश्रुतिः॥ अथा
न्यपरिव्राडेकशाटी परिहितो मुंडउदरपात्र्यरण्यनिष्ठो भैक्षार्थं ग्रामं प्रविशेत्कुसायं प्रदक्षिणेनाविचिकित्सं सार्ववर्णिकं भैक्ष
चरमभिक्षा[illegible]सपतितवर्जमिति॥ आरुणीश्रुतिः॥ यत्र यो भिक्षार्थं ग्रामं प्रविशति पाणिपात्रमुदरपात्रं वा ॐ हीं ॐ हीं ए

तदुपनिषदं विन्यसेद्विद्वान्य एवं वेद॥ औपनिषदवदशनमाचरेदिति॥ गौतमः॥ ग्रहवित्प्राश्यय यथाचम्य निराहारो भवेद्गृही॥ प्राश्याचम्य
तथा भिक्षुर्निराहारो गृहे गृहे॥ पात्रमस्य भवेत्पाणिस्तेन नित्यं गृहान्नटेत्॥ उदरपात्रविषये यतिधर्मसमुच्चये विष्णु[illegible]शेषः॥ आस्येन तु
यदाहारं गोवन्मृगयते मुनिः॥ तेजोमयास्तस्य लोका भवंतीति मनुजाधिप॥ मुंडकोपनिषदि पाणिपात्रमुदरपात्रं वा गेहे गेहे विश
त्केवलमात्रेण नापरं गृह्णीयात्स्वदेहे सर्भुजन्नाच्छन्न कुलाकुलेषु सर्वाशीति॥ शौनकः पाणिपात्रं चरन्योगी नासकृद्भैक्षमाचरेत्॥ ति
ष्ठन्भुंजञ्चरन्भुंजन्मध्ये नाचमनं ततः॥ शौनकगौतमवचनाभ्यां आचमने विकल्पः॥ पराशरः॥ ग्रामैकरात्रवासिनः॥ नगरेती
र्थवासाद्येषु पंचरात्रवासिनः॥ उदरादिपात्रिणः अभिशस्तपतितवर्जं चातुर्वर्ण्यं भैक्षं चरंतः॥ आत्मत्वेनावतिष्ठंत इति॥ बौधाय
नः॥ भैक्षं च सार्ववर्णिभ्य एकान्नं वा द्विजातिषु॥ न नूदरपात्रिणः॥ परमहंसस्य बाह्यपात्राभावात्कथं भैक्षं माधूकरमुच्यते॥ आयसा
दिपात्रं गृह्णीयात्पाणिना शकलेन वेत्यादिवचनात्परमहंसस्यापि यतेः॥ कदाचित्तादृशे देशे प्राप्तिः स्यात्तत्र रिक्तहस्तो गृहमागतेम
तो किमर्थमागतो यमिति निंदितिसात्कुलाजनाः ततउपवासः स्यादेवं दिने दिने तस्मिन्देशे इतीयमा[illegible]स्यात्तस्यामापदि प्र
साया शुचिदेशस्थलेएवा दिशाकलमादाय शीर्णपर्णपुटं वा कृत्वा तेन भैक्षमादायाश्नीयात्॥ भैक्षं माधूकरं मध्ये नापि परमहंसो
ननेवेद्यं विसर्जयेत्॥ क्रतुः ग्रासादाच्छादनादन्यद्गृह्णीयान्न कथंचन॥ यावदाहरयेत्तावत्प्रतिगृह्णीत नान्यथा[illegible]इत्सादिवच

नात्॥ मधूकरं भैक्ष्यं चरन्नसंकल्पितेषु गृहेषु चरेत्तादृदं उक्तं॥ सप्तागारान्यसंकल्पिताञ्चरेद्भैक्ष्यं विधूमे सन्नमुसले एकशाटीपरि
वृतोऽजिनो वेति। याज्ञवल्क्यः यतिपात्राणि यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च॥ सलिलैः शुद्धिरेतेषां गोवालैश्चावघर्षणैः॥ मृदा
दिप्राकृतानि यतिपात्राणि भवेयुः॥ तेषां सलिलगोवालावघर्षणाच्छुद्धिः॥ साधनं द्वयं हि शुद्धिर्भिक्षाचरणादिप्रयोगांगभूतानां
उप भमेध्याद्युपहतविषया॥ तद्धाते द्रव्यप्रकरणोक्ताद्रष्टव्या॥ अतएव मनुना॥ अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च॥ तेषाम
द्भिः स्मृतं शौचं चमसानामिवाध्वरे इति चमसदृष्टांतउपपादनेन प्रायोगिकी शुद्धिर्दर्शिता॥ पात्रांतराभावे भोजनमपि तत्रैव का
र्यं तद्भैक्ष्यं गृहीत्वैकांते पात्रेणान्येन वा तूष्णीमादाय भुंजीतेति देवलस्मरणात्॥ तत्पात्रे तु भिक्षां विधाय स्वाद्यमेव॥ तथा शि
ष्टाचारदर्शनात्॥ कलौ स्वपात्रभोजननिषेधाच्च॥ द्वापरादियुगेष्वेव पात्रभोजी भवेद्यतिः॥ कलौ नैव तु भुंजीत स्वपात्रे योगवित्तमः
इति ब्रह्मवचनं॥ कण्वः तार्णं पर्णं च पाषाणमिति॥ अत्रिः मृद्दार्वलाबुजं पात्रं वैणवं ताम्रबोपलं॥ पार्णं तार्णं तथा पाश्मं पात्रं प
र्णपुटं तथा॥ उक्तानि यतिपात्राणि ब्रह्मणा विश्वयोनिना॥ करे कर्पटके चैव आयसे ताम्रभाजने॥ भुंजन्भिक्षुर्न लिप्येत लिप्यंते
गृहमेधिनः॥ एवमाह स्वपर्णानि कृत्वा पर्णमयीं पुटीं॥ भिक्षार्थं पर्यटेद्भिक्षुः तैजसेन कदाचन॥ विष्णुः संस्कृत्य प्रणवेनाथ
भिक्षापात्रं यथाविधि॥ भास्कराभिमुखो भूत्वा संस्मरन्मनसा हरिं॥ सव्येनादाय पात्रं तु दंडं च दक्षिणेन तु॥ कण्वः॥ नमः

स्य

प्यवरान्निबोधत॥ श्रवणाद्यपि बहुभिर्यो न लभ्यः॥ शृण्वंतोऽपि बहवो यं न विद्युः॥ आश्चर्यो वक्ता कुशलोऽस्य लब्धा। आश्चर्यो ज्ञाता कुश
लानुशिष्ट इति॥ अधिकारिणा क्रियमाणानि श्रवणादीनि असति प्रतिबंधे इह जन्मन्येव ब्रह्मसाक्षात्कारं जनयंति॥ सति तु प्रतिबंधे तत्क्षये ज
न्मांतरे जनयंति॥ तथा व्याससूत्रं॥ ऐहिकमप्रस्तुतप्रतिबंधे तद्दर्शनादिति॥ प्रतिबंधकं च काम कर्मणी च तथा॥ व्यासः कामएवमनुष्याणां
पिधानं ब्रह्मबोधने॥ तस्मात्कामं त्यजन्धीरो ज्ञानमाप्नोति मोक्षदं॥ ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः॥ यथादर्शतलप्रख्ये पश्य
त्यात्मानमात्मनि॥ इति श्रवणविधिः॥ अथ भिक्षाचर्या॥ ततो मध्याह्ने पूर्वोक्तविधिना स्नानं ध्यानादीन्विधाय भिक्षाचर्यां चरेत्॥
दत्तात्रेयः॥ याचितायाचिताभ्यां च भिक्षाभ्यां कल्पयेत्स्थितिं॥ मधूकरं याचितं स्यात्प्राक्प्रणीतमयाचितं॥ प्राक्प्रणीतमयाचितादेरपि
उपलक्षणं॥ माधूकरमथैकान्नं परमहंसः समाचरेत्॥ उशनाः॥ माधूकरमसंक्लृप्तं प्राक्प्रणीतमयाचितं॥ तात्कालिकं चोपपन्नं भै
क्ष्यं पंचविधं स्मृतं॥ मनःसंकल्परहितं गृहात्रीन्पंच सप्त वा॥ मधूकवदाहरणं यत्तन्माधूकरमिति स्मृतं॥ शयनोत्थापनात्पूर्वं प्रा
र्थितं भक्तिसंयुतैः॥ तत्प्राक्प्रणीतमित्याह भगवानुशना मुनिः॥ भिक्षाटनसमुद्योगात्प्राक् केनापि निमंत्रितं॥ अयाचितं तु तद्भैक्ष्यं भो
क्तव्यं मनुरब्रवीत्॥ उपस्थानेन यत्प्रोक्तं भिक्षार्थं ब्राह्मणेन हि॥ तात्कालिकमिति ख्यातं तदन्नं वै मुमुक्षुणां॥ सिद्धमन्नं भक्तजनैरानीतं प
न्मठं प्रति॥ उपपन्नं तदित्याहुर्मुनयो मोक्षकांक्षिणः॥ भिक्षा पंचविधा ह्येता सोमपानसमाः स्मृताः॥ तासामेकतमा यापि वर्तयन्नसि

पीडयित्वा तु चात्मानं मत्यान्नं संप्रयच्छति ॥ सा भिक्षा हिंसिता ज्ञेया तादृशीं वर्जयेद्यतिः ॥ पंचाहं सप्तरात्रं वा यत्र भिक्षा न लभ्यते ॥ तद्गृहं
वर्जयेद्भिक्षुः चांडालगृहवत्सदा ॥ अत्रिः हितं मितं सदाश्नीयात् यत्सुखेनैव जीर्यते ॥ धातुः प्रकुप्यते येन तदन्नं वर्जयेद्यतिः ॥ यातु पर्यु
षिता भिक्षा नैवेद्यादिषु कल्पिता ॥ तामभोज्यां विजानीयाद्दाता च नरकं व्रजेत् ॥ आयसेन तु पात्रेण यदन्नमुपदीयते ॥ भोक्ता विष्ठा
समं भुंक्ते दाता च नरकं व्रजेत् ॥ अथ भैक्ष्यप्रशंसा ॥ विष्णुः ॥ न भिक्षायां भवेद्दोषो न च भिक्षा प्रतिग्रहः ॥ सोमपानसमा भिक्षा तस्मादह
रहश्चरेत् ॥ शातातपः ॥ भिक्षा माधूकरी नाम सर्वपापप्रणाशनी ॥ ध्रुव धूता च पोता च सोमपानं दिने दिने ॥ भिक्षाहारो निराहारो भि
क्षा नैव प्रतिग्रहः ॥ श्रोत्रियान्नं च भैक्ष्यं च हुतशेषं च यद्धविः ॥ आनखेभ्यः शोधयेत्पापं तुषाग्निरिव कांचनं ॥ गंगायाः सलिलं पुण्यं
वीलिग्रामशिला तथा ॥ भिक्षान्नं पंचगव्यं च पवित्राणि युगे युगे ॥ कण्वः अब्बिंदुर्यः कुशाग्रेण मासि मासि समश्नुते ॥ निरपेक्षस्तु
भिक्षाशी स तु तस्माद्विशिष्यते ॥ मेधातिथिः अकार्पण्यं तु बह्वन्नं मन्यते यत्र मानवाः ॥ निराशं तेन मुद्दिग्ना स्तद्गृहं यत्नतो व्र
जेत् ॥ अत्रिः ॥ गोदोहमन्नं यावत्कं वा सकृत्पेषणमेव वा ॥ एककालं प्रतीक्षेत दत्तानेन विना यतिः ॥ क्षणमेकं न तिष्ठेद्गृहीणां दर्श
नाद्यतिः ॥ संभ्रमं च न चक्षेत भिक्षादानार्थमुत्तमं ॥ न कुप्येत न कंप्येत न हर्षं नैव कुत्सयेत् ॥ अतिग्रहं लोभात् न पुनस्तद्गृहं व्रजेत् ॥
यावतो दरपूर्तिः स्यात्तावद्भैक्ष्यं समाचरेत् ॥ शिक्षमप्यधिकं भिक्षुरादद्यानो व्रजेत्यभा ॥ क्रतुः पंचसप्तगृहाणां च भिक्षामिच्छे

त्क्रियावतां ॥ गोदोहनमात्रमाकांक्षी निःक्रांतो न पुनर्विशेत् ॥ वशिष्ठः ॥ ब्राह्मणकुले वा यल्लभेत तद्भुंजीत मधुमांसवर्जं सायं प्रातर्न चान्त
येदिति ॥ सायंप्रातरिति तु अशक्त भिक्षुविषयं ॥ एककालं चरेद्भैक्ष्यमित्यादि बहुवाक्यविरोधात् ॥ भिक्षाटनमुपक्रम्य क्वचिन्मौ
नेन भैक्ष्यभुक् ॥ नातिक्रमेद्गृहान्मोहाद्यत्र बाधा न विद्यते ॥ गृहातिक्रमणं कुर्याद्यत्र लोभादिना यतिः ॥ प्राणायामशतं कुर्यात् प्रा
यश्चित्तं तथा यतेः ॥ नक्तभोजी भवेद्भिक्षुर्मोक्षधर्मानुशासनात् ॥ मुहूर्तं यन्न दिवाद्यपरात्रेशेषोन्वादिकं यतेः ॥ सदा भिक्षू रात्रौ
नैवाहरेत्क्वचित् ॥ निशायाः प्रथमे यामे जपहोमार्चनं स्मृतं ॥ स्वाध्यायो भोजनं प्रोक्तं वर्जयित्वा महानिशां ॥ पश्चिमे तु तथा या
मे बलाभ्यासो विधीयते ॥ जपस्नानादिकं होमो वर्जयित्वा तु भोजनं ॥ देवोद्याने साधुगेहे महालये सरित्सु च ॥ रात्रौ गृह्णन्नद्
भ्येत तथैके विमले ह्रदे ॥ जमदग्निः ॥ अ[illegible]श्नन्माधूकरीं भिक्षां नैवेद्ये तु विसर्जने ॥ परपाकं न गृह्णीयात्किंचिदन्नमुपस्थितं ॥
सर्वं माधूकररूपेण नैवेद्यं समर्पितं सत्यर्थः ॥ व्यासः ॥ श्रद्धानस्य भोक्तव्यं चोरस्यापि विशेषतः ॥ न त्वेवं बहुयाज्यस्य यश्चो
पनयते बहून् ॥ अत्रिः ॥ उद्यतामाहृतां भिक्षां पुरस्तादप्रचोदितां ॥ भोज्यां प्रजापतिर्मेने अपि दुष्कृतकारिणः ॥ दत्तात्रेयः ॥
कृते देशं त्यजेद् ग्रामं त्रेतायां द्वापरे कुलं ॥ कर्तारं तु कलौ दुष्टं त्यक्त्वा भैक्ष्यं चरेद्यतिः ॥ भैक्ष्यादत्यन्नयाचेत न वे[illegible]वोपविशे
त्कचित् ॥ उद्यतानाचमन्येत न चैनं श्रावयेत्पुनः ॥ भिक्षाटने स्त्रियः कश्चित् श्रोत्रियाणां गृहे गृहे ॥ तासां विलोकनं का

र्थयथा मातुः स्वसुस्तथा॥ आत्मसंमितमाहारमाहारेदात्मवान्यतिः॥ अत्यंतं क्षुधितस्यापि समाधिर्नैव जायते॥ कात्या
यनः॥ आहारस्य तु द्वौ भागौ तृतीयमुदकस्य तु॥ वायोः संचारणार्थाय चतुर्थमवशेषयेत्॥ यमः आहारस्य चतुर्थांशम
र्धं वाप्याहरेद्यतिः॥ युवा चेवारुजः शक्तः प्रसंगं तत्र वर्जयेत्॥ अन्नसंगाद्बलं दर्पो विषयासक्तिरेव च॥ कामक्रोधस्तथा लोभः
पतनं नरके ध्रुवं॥ तावज्जितेंद्रियो न स्यात् विजितान्येंद्रियः पुमान्॥ न जयेद्रसनं यावज्जितं सर्वं जिते रसे॥ संन्यासेन ग्रा
सा॥ अष्टौ ग्रासा मुनेः प्रोक्ताः षोडशारण्यवासिनः॥ द्वात्रिंशत्तु गृहस्थस्य यथेष्टं ब्रह्मचारिणः॥ तत्र ग्रासप्रमाणं व्याघ्र
आह॥ चतुरंगुलमुत्सेधं चतुरंगुलमायतं॥ एतद्ग्रासप्रमाणं तु व्याघ्रेण परिभाषितं॥ बद्धान्नं पच्यते यत्र मन्यंते यत्र मान
वाः॥ अनुद्विग्नाः प्रयच्छंति तं देशं यत्नतो व्रजेत्॥ भिक्षाटनं प्रकुर्वाणो ह्यमेध्याश्वादिवा स्पृशेत्॥ भिक्षां गृहीत्वा स्नात्वा
च प्राणायामान्षडाचरेत्॥ अमेध्यनिचयं चैव स्पृष्ट्वा देवलकं यतिः॥ सपात्रो विधिवत्स्नात्वा विशुध्यत्वा विनश्यति॥
उदक्याशवचांडालचौरनग्नकपालिभिः॥ स्पृष्टाभैक्षं त्यजेद्भिक्षुः सचेलं जलमाविशेत्॥ पादत्राणे स्थितोपाद
वस्पृश्यं स्पृश्यते यदि॥ पादत्राणपरित्यागे आचांते शुचितामियात्॥ विना दंडोदपात्रं तु न गच्छेत्स्नातिसत्तमः॥ भिक्षा

र्थं स्नानतथादित्यं समाचांतमुपानहौ॥ सर्वदोपानहौ भिक्षुर्न त्यजेत्तु कदाचन॥ उदपात्रं च भिक्षां च दुष्याद्धृतउपानहौ॥ विधूम
न्नमुसले व्यंगारे भुक्तवज्जने॥ कालेपराह्ने भूयिष्ठे भिक्षाटनमथाचरेत्॥ आदित्यपुराणे। मेध्यं भैक्ष्यं चरेन्नित्यं सायाह्ने वाग्य
तः शुचिः॥ एकवासा विशुद्धात्मा मंदगामी युगांतदृक्॥ यथालब्धां त्रीयात्सुजातासंस्कारवर्जितः॥ अत्रिः॥ अनिंद्यं वै व्रजेद्गेहं
निंद्यं गेहं तु वर्जयेत्॥ अनावृते विशेद्द्वारि गेहे नैवावृते व्रजेत्॥ न भिक्षेद्द्वारं रंध्रेण भिक्षालिप्सुः क्वचिद्यतिः॥ न कुर्यात्सि क्वचित्
घोषं न द्वारं ताडयेत्क्वचित्॥ तथा चोक्तं॥ प्राणवृत्त्यैव संतुष्ये मुनिर्नैवेंद्रियप्रियैः॥ ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः
अलब्ध्वा लब्ध्वा नाविदे। काले कालेशनं विनक्षचित्॥ लब्ध्वा न हृष्ये हृषेद्धृतिमान् उभयं दैवतंत्रितं॥ आहारार्थं समीहेत यु
क्तं तत्प्राणधारणं॥ तत्त्वं विमृश्यते तेन तद्विज्ञाय विमुच्यते॥ यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतापरं॥ यथावासस्तथाशय्या प्रा
प्तं प्राप्तं भजेन्मुनिः॥ अत्रिः नैव सव्यापसव्येन भिक्षाकाले व्रजेद्गृहान्॥ अनिंद्यातिक्रमे योगी प्राणायामशतं चरेत्॥ मेधा
तिथिः॥ अनुष्ठापतितं साधुं यतिर्यः परिवर्जयेत्॥ स तस्य सुकृतं दत्त्वा दुष्कृतं प्रतिपद्यते॥ तथैव च गृहस्थस्य निराशो भिक्षु
र्को गतः॥ कृतं दत्तं तपोधीतं सर्वमादाय गच्छति॥ असंस्कृता तु या कन्या उदक्या चोदिता तु या॥ तस्मात्तं न गृहीयात्त्राण्यगो
नाय सेन वा॥ पृथक्कृता तु या भिक्षा घ्राता मार्जारमूषकैः॥ वातोपहता भुक्ता च भिक्षायोपहता भवेत्॥ शौनकः॥

त्रीन्प्राणायामान्धारयित्वा भिक्षामोमितिवारिणा संप्रोक्ष्य दक्षिणेन स्पृष्ट्वा प्रणवेनाभिमंत्र्याश्नीयादिति ॥ यमः ॥ प्रोक्षितं प्रणवेनैव कु-
तमध्यात्मिकादिषु ॥ शरीरं प्रणवत्पश्येदन्नं च प्रणलेपवत् ॥ यतिधर्मसमुच्चये ॥ गंगाभिषिक्तां तु भिक्षां योश्नाति योगवित् ॥ न त-
त्क्रतुशतैरिष्ट्वा फलं प्राप्नोति मानवः ॥ सांतपनसहस्रं तु चांद्रायणशतानि च ॥ अश्वमेधाष्टकं चैव तद्बिंदोः शेषमुत्तमं ॥ विष्णोर्नैवे-
द्यसंभुक्तं मुनिभिर्भोज्यमुच्यते ॥ अन्यदेवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेत् ॥ गंगातोयं च भैक्षं च वैष्णवान्नं विशेषतः ॥ आनखा-
ग्रोच्चयेत्पापं मंत्रैः पूतं हविर्यथा ॥ छांदोग्यश्रुतिः ॥ आहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवा स्मृतिः ॥ स्मृतिलंभे सर्वग्रंथीनां वि-
प्रमोक्ष इति । हारीतः ॥ गुरवे निवेद्य तदनुज्ञातमन्नं तं संमिलं प्राकुर्यं हस्त्रीयात् ॥ ब्रह्मचारी ब्रह्मसिद्धिमवाप्नोति मोक्षसिद्धिं तु भि-
क्षुकः ॥ विष्णुः ॥ भैक्षं यवागूं तक्रं वा पयो यावकमेव वा ॥ फलमूलविपक्वं वा कणपिण्याकसक्तवः ॥ इत्येते वै शुभाहारा योगिनः
सिद्धिकारकाः ॥ त्वङ्मूलपत्रपुष्पाणि ग्राम्यारण्यफलानि च ॥ कणा यावक पिण्याक शाक पत्र पयो दधि । भिक्षां सर्वरसोपे-
तां हिंसावर्जं समाचरेत् ॥ उत्तानवदनं कृत्वा ब्रह्मभावेन भावितः ॥ पंचप्राणाहुतिर्दद्यान्मंत्रैस्तु श्रुतिचोदितैः ॥ ॐकारपू-
र्वाः स्वाहांता मंत्रास्तैस्तु समाचरेत् ॥ नैवाहुतिं स्पृशेद्योगी दंतोष्ठाभ्यां कदाचन ॥ न स्वादयेद्रसं तत्र जिह्वया धर्मवित्क्वचि-
त् ॥ अनेन विधिना कृत्वा पंचप्राणाहुतीः पृथक् ॥ शेषमोषनमाश्रमशुध्यर्थं श्रुतिशासनात् ॥ मृष्टामृष्टेन कुर्वीत रागद्वे-

षौ च चेतसा ॥ मिताशनो भवेन्नित्यं भिक्षुर्मोक्षपरायणः ॥ कामदर्पादयो दोषा न भवंति मिताशिनः ॥ अंतर्जानु तथा कृत्वा बाहू पादौ तथा
भुवि ॥ भाजनं वै समादाय भिक्षुः सव्यकरेण तु ॥ दक्षिणेन करेणैव चिन्मये नांतरात्मना ॥ ध्यायन्स भोजनं कुर्याद्यावन्नावतृप्तो भवे-
त् ॥ न स्पृशेत्सव्यहस्तेन भुंजानोन्नं कदाचन ॥ न पादौ न शिरो नाभिं स्तन पदा भाजनं स्पृशेत् ॥ पात्रमभिहृत्य यो विधिरुक्तः तस्याप-
वादमाह ॥ अन्यपात्रे हविर्भुंक्ते हव्यकव्येषु नुत्त्वया ॥ राजते ताम्रसौवर्णे तत्रायं नास्ति वै विधिः ॥ सौवर्णेषु च पात्रेषु ताम्ररौप्यमयेषु
च ॥ भुंजन्भिक्षुर्न दुष्येत दुष्येत तत्परिग्रहात् ॥ भुक्त्वा पात्रं यतिर्नित्यं क्षालयेन्मंत्रपूर्वकं ॥ न दुष्येत्तस्य तत्पात्रं यज्ञेषु चमसो यथा ॥
क्रतुः ॥ अवीरा स्वैरिणी कुष्ठी गर्भभर्तृगृहा सती ॥ कन्या धात्री पुनर्भूश्च नादद्यात्तेषु तामपि ॥ न चोत्पत्तिनिमित्ताभ्यां नक्षत्रां-
गविद्यया ॥ नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ अत्रिः ॥ कुटुंबसंकटं चैव मलेनापहतं गृहं ॥ पीडयान्नं प्रयच्छेत तद्गृहं
वर्जयेद्यतिः ॥ उदक्यां चोदितं चान्नं द्विजान्नं शूद्रचोदितं ॥ शाण्यंगे चायसे कृतं भिक्षुर्मलेन वर्जयेत् ॥ नाश्नंति ह्यशुचिं देवा ना-
श्नंति वृषलीपतेः ॥ स्त्रीजितान्नं न चाश्नंति तदन्नं वर्जयेद्यतिः ॥ चिकित्सकस्य मृगयोः शल्यहर्तुश्च पाशिनः ॥ कुलटाषंढयो-
रन्नमुद्यतं संत्यजेद्यतिः ॥ श्रोत्रियान्नं न भिक्षेत श्रद्धाभक्तिबहिःकृतं ॥ व्रात्यस्यापि गृहे भिक्षेच्छ्रद्धाभक्तिपुरस्कृतं ॥ दर्व्या
देयं घृतं चान्नं लवणं व्यंजनं तथा ॥ अपक्वं तैलपक्वं च न तु दर्व्या कदाचन ॥ हस्तादेयं तु यद्दर्व्या दर्व्या देयं तु हस्ततः ॥ एतयोश्च

लणोऽश्नीयात्सोऽश्नीयान्मूत्ररेतसी ॥ विष्णुः ॥ यस्तु भैक्ष्यं समादाय पर्युषेद्योगवित्तमः ॥ स पर्युषितदोषेण भिक्षुर्भवति वै कृमिः ॥
तस्माद्भिक्षां समादाय पर्युषेन्न कदाचन ॥ भिक्षार्थं प्रविशेद्ग्राममभावे वनवासिनां ॥ स्वरक्तस्य गृहे भिक्ष्येन्न तु तेष्वेव नित्यशः ॥ अ
भावे बहुगेहानां तेषु भिक्षेदलोलुपः ॥ देवलः ॥ उदक्याशवचांडालचोरनग्नकपालिकान् ॥ पतितान्पिशुनान्स्पृष्ट्वा भिक्षां भिक्षुः
परित्यजेत् ॥ एतद्व्यतिरिक्तस्पृश्यमात्रस्पर्शे जाबालिः ॥ भिक्षाटने च संन्यासी अमेध्यं यदि संस्पृशेत् ॥ भिक्षां गृह्य ततः स्नात्वा
प्राणायामान्समाचरेत् ॥ जमदग्निः ॥ श्वकाककोटवेश्याविट्खरोष्ट्रस्पर्शने सति ॥ सभैक्ष्यस्तु जले मग्नः भुक्त्वा जप्त्वाघमर्ष
णं ॥ जाबालिः ॥ भिक्षाटने च संन्यासी ह्यमेध्यं यदि संस्पृशेत् ॥ भिक्षां गृह्य ततः स्नात्वा प्राणायामान्षडाचरेत् ॥ निमंत्रित
स्तु संन्यासी यदा भैक्ष्यं समाचरेत् ॥ लोभात्तत्र प्रवर्त्तेत पतत्येव न संशयः ॥ यत्किंचिद्दीयमानं तु गृहीत्वा करसंस्थितं ॥ भिक्षा
भिक्षुर्न गृह्णीत काकयोनिषु जायते ॥ उपरछानाद्यदापूर्वं भिक्षार्थं देशीनोपिबेत् ॥ न गच्छेत्तु द्रुतं भिक्षुस्तद्देहे वै कथंचन ॥ द्रू
वेवाश्रमिणो भोज्यो वानप्रस्थगृही तथा ॥ अभोज्यमन्नमन्येषामितरेषु तु लिंगिनां ॥ मेधातिथिः ॥ ब्राह्मणक्षत्रियविशां
मेध्यानां भैक्ष्यमाचरेत् ॥ तत्राप्यसंभवे पूर्वाद्दाद्दीतोत्तरोत्तरं ॥ द्विजाभावे तु संप्राप्ते उपवासे त्र्यहे गते ॥ भैक्ष्यं शूद्राद्विप्रा
ह्यं रक्षेत्प्राणान्द्विजोत्तमः ॥ भिक्षाटनानंतरमेव शेषकालं पुराणेन नयेत् ॥ तथा च दक्षः ॥ इति पुरा[redacted]णाभ्यां [redacted] षष्ठस्त
हास

कालेदंडमेकं नोदपात्रं कदाचन ॥ याज्ञवल्क्यः ॥ अप्रमत्तश्चरेद्भैक्ष्यं सायाह्ने नभिलक्षितः ॥ रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः ॥
अप्रमत्तो वाक्चक्षुरादिचपलरहितः ॥ नक्तात्परश्चोपवासस्तूपवासादयाचितं ॥ अयाचितात्परं भैक्ष्यं तस्माद्भैक्ष्येण वर्तयेत् ॥ अत्रिः ॥ नैव
सव्यापसव्येन भिक्षाकाले गृहान्व्रजेत् ॥ अनंतरं क्रमाद्भिक्षां प्रशस्तां न तु कीर्तयेत् ॥ संभवे बहुगेहानां न तु तेष्वेव नित्यशः ॥ श्रृङ्गरो
पनेवाश्नीयात्स्वान्नं शिशुकैः सह ॥ दंपत्योर्भुक्तशेषं तु भुक्त्वा चांद्रायणं चरेत् ॥ इत्येकभिक्षाविषयं ॥ भुक्त्वाभुक्त्वोपभुंजीत नियमा
र्थं यतिः सदा ॥ भैक्ष्याद्युपार्जितो भिक्षुः पश्चात्केन चिदाहृतं ॥ फलं मूलं पयस्तक्रं दधि पुण्यं घृतं तथा ॥ शाकादिव्यंजनं पेयं गृह्णन्न भिक्षु
र्न दुष्यति ॥ जाबालः ॥ एकपात्रं तु भिक्षूणां निर्दिष्टं फलमुत्तमं ॥ नैव दोषो हि पात्रेण अशक्तो व्याधिपीडिते ॥ आश्वलायनः ॥ उपाहृतोत
तो भैक्ष्याद्गृहीत्वा तीर्थमर्दमं ॥ प्रक्षाल्यांतर्हिते देशे भैक्ष्यपात्रं विधाय तत् ॥ मृत्तोयेन पृथक्पादौ हस्तौ प्रक्षालयेद्दश ॥ आचम्याथ त्रिरा
क्रम्य प्राणास्तु पुनराचमेत् ॥ आपोशनविधिं कृत्वा पंच प्राणाहुतापरं ॥ केशकीटादिभिर्व्याप्तं पिंडमुत्सृज्य दूरतः ॥ हस्तं प्रक्षाल्य
भस्माथ क्षिप्त्वाश्नीयात्ततः पुनः ॥ केशादिमुखसंलग्नं क्षिप्त्वा ग्रासं तु तत्क्षणात् ॥ अपां द्वादशगंडूषैः शाल्यास्य भोजनं ततः ॥ वा
मेनांगेन संसक्तं निधायैक कमंडलुं ॥ विष्णुः सर्वेषामेव भिक्षूणां त्यक्तसर्वममत्वतां ॥ अतैजसानि पात्राणि भुज्यर्थे कृतवान्म
नुः ॥ मनुः ॥ एककालं चरेद्भैक्ष्यं न प्रसज्येत विस्तरं ॥ भैक्ष्ये प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥ बोधायनः ॥ पादौ प्रक्षाल्याचम्य

भुक्त्वाघ्रात्वाचयोनरः॥नहृष्यतिनग्लायतिसविज्ञेयोजितेंद्रियः॥ विष्णुपुराणे॥ निःसंगतामुक्तिपदंयतीनांसंगादशेषाः
प्रभवंतिदोषाः॥आरूढयोगोपिनिपात्यतेधःसंगेनयोगीकिमुताल्पबुद्धिः॥ मनोरथानांनसमाप्तिरस्तिवर्षायुतायथ
वापिलक्षणैः॥पूर्णेषुपूर्णेषुपुनर्नवानामुत्पत्तयःसंतिमनोरथानां॥ यावंतःकुरुतेजंतुःसंबंधान्मनसःप्रियान्॥ता
वतोस्यनिखन्यंतेहृदयेशोकशंकवः॥नजातुकामःकामानामुपभोगेनशाम्यति॥हविषाकृष्णवर्त्मेवभूयएवाभिवर्ध
ते॥यत्पृथिव्यांव्रीहियवंहिरण्यंपशवःस्त्रियः॥एकस्यापिनपर्याप्तंतस्मात्तृष्णांपरित्यजेत्॥यादुस्त्यजादुर्मतिभिर्जीर्य
तोयानजीर्यते॥तांतृष्णांसंत्यजेत्प्राज्ञःसुखेनैवाभिपूर्यते॥तत्कर्मयन्नबंधायसाविद्यायाविमुक्तये॥आयासाया
परंकर्मविद्यान्याशिल्पनैपुणं॥कःकेनरक्ष्यतेजंतुर्जंतुःकःकेनहन्यते॥हंतिरक्षतिचैवात्माह्यसत्साधुसमाचरे
न्॥तापत्रयेणाभिहतंयदेतदखिलंजगत्॥तदाशोच्येषुभूतेषुद्वेषंप्राज्ञःकरोतिकः॥यदानकुरुतेभावंसर्वभूतेषुपाप
कं॥समदृष्टेस्तदापुंसःसर्वाःसुखमयादिशः॥अन्येषांयानिपापानिचिंतयंत्यात्मनोयथा॥तस्यपापागमस्ता
तेहत्वोभावानविद्यते॥कर्मणामनसावाचापरपीडांकरोतियः॥तद्बीजंजन्मफलतिप्रभूतंतस्यचाशुभं॥सोहं

नपापमिच्छामिनकरोमिवदामिच॥चिंतयन्सर्वभूतस्थमात्मन्यपिचकेशवं॥शारीरंमानसंदुःखंदैवंभूतभवंतथा॥सर्वत्रसम
चित्तस्यतस्यमेजायतेकुतः॥एवंसर्वेषुभूतेषुभक्तिरव्यभिचारिणी॥कर्तव्यापंडितैर्ज्ञात्वासर्वभूतमयोहरिः॥सर्वभूतात्मकेता
तजगन्नाथेजगन्मये॥परमात्मनिगोविंदेमित्रामित्रकथाकुतः॥त्वय्यस्तिभगवान्विष्णुर्मयिचान्यत्रचास्थितः॥यतस्ततोयंमि
त्रंवैरीशत्रुश्चेतिपृथक्कुतः॥देवामनुष्याःपशवःपक्षिवृक्षसरीसृपाः॥रूपमेतदनंतस्यविष्णोर्भिन्नमिवस्थितं॥एतद्विजानतास
र्वंजगत्स्थावरजंगमं॥द्रष्टव्यमात्मवद्विष्णुर्यतोयंविश्वरूपधृक्॥एवंज्ञातेसभगवाननादिःपरमेश्वरः॥प्रसीदत्यच्युतस्तस्मि
न्प्रसन्नेक्लेशसंक्षयः॥मनुः॥अस्थिस्थूणंस्नायुबद्धंमांसशोणितलेपनं॥चर्मावनद्धंदुर्गंधिपूर्णंमूत्रपुरीषयोः॥जराशोकस
माविष्टंरोगायतनमातुरं॥रजस्वलमनित्यंचभूतावासमिमंत्यजेत्॥सांतःकरणेसेंद्रियेदेहेआत्मबुद्धिंविवेकबुध्यात्यजेदि
तिश्लोकार्थः॥नदीकूलंयथावृक्षोवृक्षंवाशकुनिर्यथा॥तथात्यजन्निमंदेहंकृच्छ्राद्ग्राहाद्विमुच्यते॥कृच्छ्राद्दुःखसमुदायात्
विभुः॥त्यक्त्वालोकांश्चवेदांश्चविषयाणींद्रियाणिच॥आत्मन्येवस्थितोयस्तुप्राप्नोतिपरमांगतिं॥दोषदर्शीभवेत्तत्रयत्ररागः
प्रवर्तते॥अनिष्टंतमितंपश्येत्ततःक्षिप्रंविरज्यते॥यदिनामास्यकायस्ययदंतस्तद्बहिर्भवेत्॥दंडमुद्यम्यलोकोयंशुनःका
कांश्चवारयेत्॥यान्येवमलवाहीनिपुंसितिष्ठंतियोषितां॥तान्येवखलुकान्यानिअहोपुंसांविडंबनं॥चर्मखंडंद्वि

धाम्नि न्नमपानो ह्यारभूपितं ॥ येशमंते नरास्तेभ्यः साहसं किमतः परं ॥ पृथिव्यां बीजवत्पुंसि तिष्ठसेवशुभाशुभं ॥ आब्रह्मणः
पादहानांतरस्येवनालतः ॥ यथा पृथिव्यां बीजानि रत्नानि निधयो यथा ॥ एवमात्मनि कर्माणि तिष्ठंति ▪ चविशंति ॥ नित्यं ज्ञानं
समासाद्य नरो बंधात्प्रमुच्यते ॥ धर्मात्सुखं च ज्ञानं च ज्ञानान्मोक्षेधिगच्छति ॥ अनूदकानुयासंध्या वाक्कायक्लेशवर्जिता ॥ संधि
नी सर्वभूतानां सा सध्यात्वेकदंडिनां ॥ याज्ञवल्क्यः ॥ ध्यानयोगेन संपश्येत् सूक्ष्म आत्मात्मनि स्थितः ॥ योगः चित्तवृत्तिनिरो
धः ॥ आत्मैकाग्रता ध्यानं ॥ योगेन निदिध्यासनपरपर्यायेण सूक्ष्मशरीराद्व्यतिरिक्तः शेइ तत्रहः ॥ आत्मनि ब्रह्मण्यवस्थितः ॥
इत्येवं तत्त्वंपदार्थयोरभेदं सम्यक्पश्येदपरोक्षीकुर्यात् ॥ लोहितार्कमुपासीत संध्यामातारकोदयात् ॥ हृत्पद्मपकोटरावासं भि
न्नात्मज्योतिषं हरिं ॥ ध्यायन्नारायणं ध्यादौ त्रीन् कृत्वा प्राणसंयमान् ॥ तावद्ध्यायेत्पुनः यावन्निद्रावशमुपागतः ॥ सुप्तोत्थितः
पुनर्ध्यायेत्तिष्ठन्ध्यायेन्जपेत्पुनः ॥ एकस्मिन्नपि व्यतिक्रांते मुहूर्ते ध्यानवर्जिते ॥ दस्युभिर्मुषितस्येह युक्तमाक्रंदितं भृशं ॥
प्रागग्रे पररात्रे च मध्यरात्रे समाहितः ॥ संध्यास्वपि विशेषेण चिंतयेन्नित्यमीश्वरं ॥ इत्येवं शरीरावस्था ज्ञातव्या ॥ अथ पर्यट
नविधिः ॥ अत्रिः ॥ विमवद्विंध्ययोर्मध्ये ख्यातः पुण्यतमश्रुतो ॥ देशः सरस्वतीतीरे नर्मदायास्तु पश्चिमे ॥ दृष्टो वेवद्भिना पू
र्वं पवित्रीकरणाय वे ॥ योगज्ञानतपोध्यानसिद्ध्यर्थं च महात्मना ॥ तस्मिन्देशे सदा भिक्षुः स्वधर्ममनुपालयन् ॥ पर्यटे

मकोनयेत् ॥ कालावृत्तिविशेषः ॥ अंगिराः ॥ पुराणश्रवणे भक्तिर्मुख्यस्वच्छापि प्रवर्तते ॥ यत्तयाविछिन्नयामुक्तिस्तस्मात्पौराणम
भ्यसेत् ॥ तदभ्यासात्परब्रह्मभावमाप्यते मुनिः ॥ बृहस्पतिः ॥ बंधमोक्षविगाहो बुध्वा चेन्मोक्षणेच्छया ॥ उपरुध्यान्वेषणेयु
क्तः कोनमुच्येत बंधनात् ॥ यथा चित्तं समासक्तं जंतोर्विषयगोचरे ॥ तथा नारायणे ध्येयं कोनुमु० आदरेण यथा स्तौति धनवं
तं धनेच्छया ॥ तथा चेद्विश्वकर्तारं को नु मु० ॥ यथास्य निपुणः सम्यक् परदोषेक्षणं प्रति ॥ तथा चेन्निपुणः स्वेषु कोनु० अर्थार्थि
या निकार्माणि करोति कृपणो जनः ॥ तान्येव यदि मोक्षार्थं कोनु० अशास्त्रदृष्टमार्गेषु यथा चित्तं लयो भवेत् ॥ यद्येवं शास्त्र
दृष्टेषु कोनु० यावत्प्रलपते हृष्टो देशराज्यादिकं विभुः ॥ तावच्चेत्प्रलपेच्छास्त्रं कोनु० ॥ सुतां रूपवतीं दृष्ट्वा यथा चित्तं प्रकंपते ॥ त
था चेत्परदारेषु कोनु० स्तूयमानो यथा नित्यं स्तस्तमोपवेन्नरः ॥ तथैव निंद्यमानोपि कोनु ॥ अपापमशठं वृत्तमजिह्मं नि
त्यमाचरेत् ॥ इंद्रियाण्युपसंहृत्य कूर्मोंगानि सर्वशः ॥ क्षीणेंद्रियमनोबुद्धिर्निरीक्षेत निरिंद्रियः ॥ निर्द्वंद्वो निर्नमस्कारो निः
स्वधाकार एव च ॥ निर्ममो निरहंकारो निरपेक्षो निराशिषः ॥ निराश्रः सर्वभूतेषु निराशीर्निःपरिग्रहः ॥ सर्वतः सर्वतो
मुक्तो मुच्यते नात्र संशयः ॥ दक्षः ॥ वेणवेन त्रिदंडेन न त्रिदंडीति कथ्यते ॥ अध्यात्मदंडयुक्तो यः स त्रिदंडीति चोच्यते ॥
वागादिदंडयुक्तस्तु प्रत्यगात्मन्यवस्थितः ॥ परब्रह्मणि लीनो यः स त्रिदंडी व्यवस्थितः ॥ यमः ॥ श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च

संचरेत्क्वचित् ॥ वपनानंतरं स्नायान्नद्यां द्विर्द्वादशाभिर्यतिः ॥ द्वादशे वपनं कुर्वीत क्षौरांते प्राणसंयमन् ॥ आषाढ्यां पौर्णमा
स्यां तु कारयेद्वपनं यतिः चातुर्मास्यस्य मध्ये तु वर्जयेद्वपनं यतिः ॥ अथ क्षौरविधिः ॥ अत्र ॥ संप्रदायविद्वचनानि ६
गुरून्नत्वा शिरस्यां मः क्षालनं तदनंतरं ॥ आचम्य वाग्यतो यज्ञात्तवासाः क्षौरमाचरेत् ॥ अंतर्धाय तृणं किंचित्तत्र निक्षेपयेद्यतिः ॥ क्षुरसं
दर्शनं चैव तथा नखनिकृंतनं ॥ अभिमंत्र्य द्रूषद्रुरं प्रणवेः प्रोक्षयेज्जलं क्षुरमादाय तीरेण श्मश्रुकेशान्निकृत्य च ॥ शिरोरुहांते नासा
दृष्ठितां व्रप्रयतो यतिः ॥ कारयेत्करपादस्थनखानां च निकृंतनं ॥ द्रूषद्रुरं निमज्जाथ तीरं गत्वोपविश्य च ॥ प्रतिष्ठानं द्रूष
द्रुरं केशवारभ्य पादयोः ॥ भूमद्रंदद्यो न्मुखेच्चैव प्रतिवारं जनं तथा ॥ ततो जलं प्रविश्याथ शिरआलेप्य सन्मृदा ॥ द्रूषद्रुरं निमज्ज्याप्
यप्रतिवारं मदं तथा ॥ पुनराकृष्य तत्तीरं गत्वा गंडूषमाचरेत् ॥ पंचैकादशवारं च सम्यगाचम्य यत्नतः ॥ प्राणायामांस्ततः कुर्यात्
पंचैकादशसंख्यया ॥ क्षौरस्नानं यतीनां तु व्यासवर्यैः प्रकीर्तितं ॥ ततो मठमागत्य गृहपूजां कुर्यात् ॥ अत्रिः ॥ वपनानंतरं स्नात्वा
पूजयेत्पुरुषोत्तमं ॥ मनसा कर्मणा वाचा पूजयेच्च परस्परं ॥ यतिधर्मसमुच्चये व्यासपूजाप्रकारः ॥ देवं कृष्णं मुनिं व्यासं भाष्यका
रं गुरोर्गुरुं ॥ गुरुं देवगणाध्यक्षं दुर्गां देवीं सरस्वतीं ॥ गणो गणेशोऽध्यक्षः क्षेत्रपालः गृहः पुनस्त्रय एव ॥ कृष्णं व्यासं भाष्यकाराणा
मेव समाचरेत् ॥ गृहत्वं तत्तत्परिवारयोगात् ॥ परिवाराश्च पुराणादिषु द्रष्टव्याः ॥ तत्र कृष्णस्य सनत्कुमारसनकसनंदनसनत्क

जाताः ॥ व्यासस्य सुमंतुजैमिनिवैशंपायनपैलाः ॥ भाष्यकारस्य पद्मपादविश्वरूपत्रोटकाचार्यहस्तामलकाचार्याः ॥ तन्मध्ये कृष्णपं
चकं तस्य दक्षिणतो व्यासपंचकं वामतः आचार्यपंचकमिति ॥ न्यायादाचाराश्च गुरुपरमगुरुपरमेष्ठिगुरवः ॥ गणेशअग्नयईशान
क्षेत्रपालः ॥ वायव्ये दुर्गा ॥ नैर्ऋत्ये सरस्वतीं ॥ यथादिशश्च लोकपालाः ॥ भगवत्पार्श्वयोर्ब्रह्मरुद्रौ ॥ अत्र भगवान्मूलमंत्रेण पूज
नीयः ॥ अन्ये पुनः प्रणवादिभिर्नमोंतैस्त तन्नाममंत्रैः पूज्याः ॥ एवं पूर्वोक्तप्रकारेण संपूज्य गोपीचंदनमृत्तिकां दंतकाष्ठदो
रकादि दद्यात् ॥ मेधातिथिः ॥ प्रशस्तां मृत्तिकां शुक्लां गृह्णीयाच्छुचिभूक्कयोः ॥ पूरणीश्च तु रोमासान्नाषाढ्यां कार्तिकोद्यात् ॥ वृ
श्रयाज्ञवल्क्यः ॥ प्राक् कृष्णे शेर्मृदमाह्यापश्रुभ्रां किंचिद्रपीडयन् ॥ प्राग्दृष्टे रिसनेन जेष्ठाषाढयोरित्यर्थः ॥ अत्र प्रथमतः ॥ एवं मृ
त्तिकासंग्रहो दंतकाष्ठपत्रादीनामपि संग्रहश्चदर्शनार्थं हिंसापरिहारार्थत्वस्य सर्वत्र समानत्वात् ॥ अधिवास्य मृदं त्वेवं गृह्णीया
च्छुभे दिने ॥ स्मरन्नम्नेश्वरं विष्णुं वाराहं क्रोडरूपिणं ॥ येनोद्धृतासि देवि त्वं क्रोडरूपेण दंष्ट्रया ॥ व्यासहस्तमायातु केशवोऽथ
रणीधरः ॥ ततः संकल्पं कुर्यात् ॥ तथा चात्रिः ॥ असति प्रतिबंधे तु मासान्वै वार्षिकानिह ॥ निवसामीति संकल्प्य मनसा बु
द्धिपूर्वकं ॥ प्रायेण प्रावृषि प्राणिसंकुलं वर्त्म दृश्यते ॥ आषाढ्यादिचतुर्मासान्कार्तिक्यंतं तु संवसेत् ॥ माधवः चतुरो मा
सान्सर्वभूतहिताय वै ॥ स्वापं यात्यतिशेषांके लक्ष्म्या सह जगत्पतिः ॥ स कृष्ण एवो स्थितो यावत्लभवेत्स सनातनः ॥ अहं

तावन्निवत्स्यामि सर्वभूतहिताय वै ॥ अत्रिः ॥ नासमानसहायेषु निवसेद्योगवित्क्वचित् ॥ वसेत्समानशीलेषु सुशीलेषु तपस्वि
षु ॥ दक्षः ॥ एको भिक्षुर्यथोक्तस्तु द्वावेव मिथुनं स्मृतं ॥ त्रयो ग्रामः समाख्यात ऊर्ध्वं तु नगरायते ॥ नगरं तु न कर्तव्यं ग्रामो वा मिथुनं तथा
एतत्त्रयं प्रकुर्वाणः स्वधर्माच्च्यवते यतिः ॥ वासो बहूनां कलहो भवेद्वार्ता द्वयोरपि ॥ एक एव चरेत्तस्मात्कुमार्या इव कंकणः ॥ राजवार्ता
दि वा तेषां भिक्षावार्ता परस्परं ॥ स्नेहपैशून्यमात्सर्यं सन्निकर्षात्प्रवर्तते ॥ निरामयं निराबाधं प्रसन्नं सलिलान्वितं ॥ मेध्यान्नबहु
लं चैव धनिनां कुलसंकुलं ॥ भक्ता यत्र जनाः सर्वे स्वशक्तिपरिपालकाः ॥ श्रद्दधाना मुदायुक्ताः शांताः कल्याणवादिनः ॥ प्रयच्छंति यथा
न्यायं भिक्षां सर्वरसान्वितां ॥ भिक्षवे पुष्कलं साधु यच्चान्यत्स्वधर्मसाधनं ॥ अयाचितानि यच्छंति तद्देशं यत्नतो व्रजेत् ॥ द्रुमशाला
तपः ॥ निगृहीतेंद्रियग्रामो यत्र यत्र वसेद्यतिः ॥ तत्र तत्र कुरुक्षेत्रं नैमिषं पुष्करं तथा ॥ अत्रिः ॥ चतुरो यं वसेन्मासान्द्वौ वा कौषिक
वार्षिकौ ॥ ध्यानानुक्रमेणैव नमस्कृत्य विधानतः ॥ अनेन विधिना भिक्षुराषाढ्यां तु समाहितः ॥ स्थानात्पावाहृजेतावद्याव
द्भवति पंचमी ॥ प्रायश्चित्तेन युज्यंते पंचम्यूर्ध्वं व्रजेद्यदि ॥ कृच्छ्रमेकं चरेद्भिक्षुर्यदि भ्रांतो न गच्छति ॥ तेषु मासेषु केशादीन्न तु संधौ न
वापु ॥ नदीं च न तरेत्तेषु क्रोशात्क्रोशादूर्ध्वं न च व्रजेत् ॥ वापयेद्यदि केशादीन् उत्तरेद्यदि वा नदीं ॥ प्राजापत्यं चरेत्तु सो प्राणायामशतं
चरेत् ॥ विस्तीर्णे ग्रामसीमांते क्रोशादूर्ध्वं व्रजेद्यदि ॥ प्राणायामान् त्रिंशत्कृत्वा अपेत्रिकशतत्रयं ॥ स्थितियोग्यान्बहून्

स्कृत्य सदा योगी वीक्षयन्वसुधातलं ॥ न रात्रौ नैव मध्याह्ने संध्ययोर्नैव पर्यटेत् ॥ न शून्येन च दुर्गे वा प्राणबाधकरे न च ॥ यत्र प्रभुर्भगवा
न्नाथस्तत्र वसेत्सदा ॥ भिक्षार्थं प्रविशेद्ग्रामं वासार्थं वा दिनत्रयं ॥ एकरात्रं वसेद्ग्रामे पत्तने तु दिनत्रयं ॥ पुरे दिनद्वयं भिक्षुर्नगरे पंचरा
त्रकं ॥ वर्षास्वेकत्र तिष्ठेत स्थाने पुण्यजलावृते ॥ आत्मवत्सर्वभूतानि पश्यन्भिक्षुश्चरेन्महीं ॥ अंधवत्कुब्जवच्चापि बधिरोन्मत्तमू
कवत् ॥ नाम गोत्रादि चरणं देशं वासं श्रुतं कुलं ॥ वयो वृत्तं व्रतं शीलं ख्यापयेन्न कदाचन ॥ विष्णुः ॥ ग्रामांते निर्जने देशे देशे नित्यवा
सं निकेतने ॥ पर्यटेत्कीटवद्भूमिं वर्षास्वेकत्र संवसेत् ॥ वृद्धानामातुराणां च भिक्षूणां संगवर्जनं ॥ ग्रामे वाथ पुरे वापि वासो नैकत्र
दुष्यति ॥ यमः ॥ एकवासा अवासा वा एकदृष्टिरलोलुपः ॥ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ॥ सत्यपूतं वदे
द्वाक्यं मनःपूतं समाचरेत् ॥ अदूषयं सतां मार्गं ध्यानासक्तो महीं विचरेत् ॥ जले जीवाः स्थले जीवा आकाशे
जीवमालिनि ॥ जीवमालाकुले लोके वर्षास्वेकत्र संवसेत् ॥ अत्रिः ॥ द्वादश्यां पूर्णमास्यां वा कुर्यात्संकल्पमास्य वा
न् ॥ आरुणिश्रुतिः ॥ वर्षासु ध्रुवशीलोऽष्टौ मासानेकाकी यतिश्चरेद्वा द्वावेव वा चरेदिति ॥ कठश्रुतिः ॥
चतुरो वार्षिकान्मासान् ग्राममेवा नगरे वसेदिति ॥ मेधातिथिः ॥ यावद्दूर्वस्य काले पि यावत्कुल्ला च मेदिनी ॥ तावन्न
विचरेद्भिक्षुः स्वधर्माननुपालयन् ॥ कक्षोपस्थशिखावर्जमृतुसंधिषु वापयेत् ॥ न त्रीनृतूनतिक्रामेन्न भिक्षुः

लंघनवर्जितः॥ सायमागम्य निवसेत्स्वाश्रमः कल्पिते गृहे॥ यतिर्यमनुसंप्राप्य चित्तमस्य प्रसीदति॥ तत्रातिष्ठेन्नरो विद्वान्मो
क्षमार्गे व्यवस्थितः॥ चातुर्मास्ये च कार्तिक्यां क्षौरं कुर्यान्न चांतरा॥ देशकालविरोधेन भाद्र्यामपि कश्चिन्मतं॥ अत्रिः॥ कार्तिक्यां
वापयित्वा तु स्नापयित्वा त्रिविक्रमं॥ परस्परं पूजयित्वा क्षामयित्वा परस्परं॥ मासद्वयं चतुष्कं वा एकत्र निवसेद्यतिः॥ नैकत्र निवसे
द्ग्रामे वर्षाभ्योन्यत्र वै यतिः॥ चातुरो यं वसेन्मासान्द्वौ वा कौषिकवार्षिकौ॥ कक्षोपस्थशिखावर्जं ऋतुसंधिषु वापयेत्॥ ऊर्ध्वं वा
र्षिकाभ्यां मासाभ्यां नैकत्रस्थानवासी स्यात्॥ इति शंखस्मृतिः॥ इत्येकदाहृतवचनेभ्यो मासद्वयं चतुष्टयं वा एकत्र ग्रामादौ नि
वसेत्॥ मासद्वयं यदा तदा भाद्र्यां क्षौरं कारयेत्॥ भाद्र्यामपि कश्चिन्मतमिति वचनात्॥ मासत्रयेण तु यदा ऋतुर्भवति वै द्वि
ज॥ तदा क्षौरद्वयं कार्यमिति शास्त्रस्य निर्णयः॥ अधिमासो यदा विप्र तदा क्षौरद्वयं भवेत्॥ मासे द्वये न प्रथमं मासे नैके तथाप
रं॥ वाराणस्यां च गोतम्यां सर्वदैकत्र निर्वसेत्॥ क्षौरनिर्णयः॥ मासद्वये यतीनां च विधेर्वा चार्धमासके॥ नित्यं नैमित्तिकं
कार्यं वपनं शुद्धिदं भवेत्॥ कालप्राप्तं सं न कुर्वंस्तत्प्राजापत्यं दिने दिने॥ पंचक्षौराणि भिक्षूणां भवंति ऋतुसंधिषु॥ प्रार
३ ब्धं तेन तत्कार्यं शंकराचार्यसंमतं॥ हरेर्बोधे प्रकुर्कर्तव्यं न्यासक्षौरं तथाटनं॥ अबोधे न पुनः कार्यं संकटे तु यथासुखं॥
तथा च मात्स्यस्कंदपुराणयोः॥ अष्टौ मासा विहारस्याद्यतीनां संयतात्मनां॥ एकत्र चतुरो मासान्वार्षिकान्निव

सेत्पुनः॥ अविमुक्ते प्रविष्टानां विहारस्तु न विद्यते॥ न देहो भविता तत्र दृष्टं शास्त्रे पुरातनैः॥ मोक्षो ह्यसंशयं तत्र पंचत्वं तु गतस्य वै॥ हन्य
मानोपि यो विद्वान्वसेद्विघ्नशतैरपि॥ स याति परमं स्थानं यत्र गत्वा न शोचति॥ गंगाकूले वसेन्नित्यं भिक्षुर्मोक्षपरायणः॥ सिद्धक्षेत्रं
तु तत्तु तेषां वा वश्ननुः शतत्रयं॥ भविष्ये॥ ब्रह्मादिदेवलोकानां मुक्तेश्च प्राप्तये नृणां॥ गंगैव परमो हेतुः कलिकाले विशेषतः॥ ब्राह्मण
स्य हि देहोयं नोपभोगाय जायते॥ इह क्लेशाय महते प्रेत्यानंतसुखाय च॥ याज्ञवल्क्यः॥ इत्येतदास्थितं वर्मयस्य मोक्षाय कृत्यसौ॥ त
त्वस्मृते रूपस्थानात्सत्त्वयोगात्परिक्षयात्॥ कर्मणां संनिकर्षाच्च सतां योगः प्रवर्तते॥ बृहस्पतिः॥ बंधमोक्षविभागज्ञो बंधाच्छेन्मोक्ष
णेच्छया॥ उपायान्वेषणे युक्तः कथं नु मुच्येत बंधनात्॥ अथाभ्यागताचारः॥ अभ्यागते यतौ स्थापयितलिंगेन शिक्षतां॥ विज्ञायसो
त्थितो भूत्वा वामवस्त्रादिसंयुतः॥ चातुर्मास्यं कियदिति पृष्ट्वा ते नोत्तरे कृते॥ अभ्यागतो यदि ज्येष्ठस्तस्मै भक्त्याभिवंद्य च च॥
तस्य दंडमथो धृत्वा तेन स्पृष्ट्वा यथाविधि॥ योग्यदेशे तु संस्थाप्य तस्मै आसनमादरात्॥ दत्वोपविष्टे तस्मिन्स गरुडासनसंस्थितः॥
तदनुज्ञां गृहीत्वा तु पंचांगं नतिपूर्वकं॥ अभ्यागतप्रयुक्तं तु पादग्रहणमादरात्॥ अथोपशं कृत्वा तत्पादौ मूर्ध्नि च धारयेत्॥ आघ्रा
य दक्षिणांसे तु धारयित्वा ततः सुधीः॥ गरुडासनआसीनो जोटिकाचैनपूर्वकं॥ अनुज्ञायास्य पंचांगं नमस्कारपुरःसरं॥ ग
हीत्वा पूर्ववत्पादावस्याष्टांगनमस्क्रिया॥ तदनुज्ञानुसारेण त्रिषष्टिद्वादशसंख्यया॥ जोजोटिमादाय विधिवत्कर्णयोआस्ये तुनः॥

विधायैकां नमस्कारं तां गृहीत्वा यथाविधि ॥ पंचांगेन प्रणम्याथ गरुडासनसंस्थितः ॥ समाप्यते यथादेशं शोचपर्यंकमाचरेत् ॥
अभ्यागतक निष्ठश्चैतेन स्थाप्याभिवंदितः ॥ गृहीत्वा तस्य दंडाग्रं पूर्वं यथावत्स्थापयेत्ततः ॥ स्थायी स्वासन आसीन शिष्यद्वारा समंशुचिः ॥
तस्मै दद्यात्ततस्तत्तु मृद्भूमौ दाय निधाय च ॥ अभ्यागतेन भूमौ तु स्थितेगरुडआसने ॥ प्रार्थितश्चैव प्रणम्यार्थं स्थाप्यनुज्ञां विधाय
तः ॥ अभ्यागतेनाथ मुक्तकटिकस्त्वाग्रसंयुतं ॥ द्विगुणीकृतवस्त्रं तु ऊर्वोपरि निधाय च ॥ यथोपदेशं पंचांगं नमस्कारे कृते सति
उत्थाप तस्य स्कंधादिग्रहणं विना चरेत् ॥ स्वासने संविशेद्भूयः समुत्थाय द्वितीयकं ॥ कवस्त्रं निक्षिप्य वस्त्रेण सम्यक्मुक्तेन सं
वृतः ॥ अभिवंद्योपविश्याथ गरुडआसनपूर्वकं ॥ प्रणाममानियथापूर्वं कृत्वा गरुडआसने ॥ उपविश्यांजलीं कृत्वा पाणिमुक्तो भवेत्तदा ॥
स्थायी तु स्वसमीपे तु स्थापयित्वासने ॥ अभ्यागतप्रयुक्ते तत्पादग्रहणमादरात् ॥ कारयेत्स्वसमीपस्थैस्तत्के निष्ठे यथाविधि ॥ जो
टीनमस्कृतिस्तद्वत्पर्यंकः शौचमप्यच ॥ तद्दिने तस्य भिक्षादि यथाशक्ति विचारयेत् ॥ इत्यभ्यागताचारः ॥ अथ पर्यंकशौचं ॥ वा
मेभ्यागतपादाभ्यां स्वहस्तार्थं चरक्षिणे ॥ मृद्भूगं विन्यस्याथ गरुडासनमास्थितः ॥ पादयोस्तु मर्दं पंच च तस्त्रस्तिस्त्र एव च ॥
द्वेचैकां च मर्दं दद्यात् जानुजंघादितः क्रमात् ॥ करयोर्दशसप्ताद्यो द्वितीये पंच सप्त च ॥ तृतीये पंच तिस्रश्च तिस्रो द्वे कूच
र्पके ॥ द्वेचैकां तमर्दं दद्यात् शौचे पर्यंकसंज्ञिके ॥ अथ योगपट्टविधिः ॥ तत्र संप्रदायविदः ॥ अधीतविद्यः सम्यक्श्च दद्याद्योग

सामान्यदिवसोल्लंघयेत् ॥ प्रत्येकैकं चरेत्कृच्छ्रमेतत्पापात्समुच्यते ॥ वर्णाश्रमे दंयतिः कुर्याद्यदि कश्चिदनापदि ॥ प्रा आपत्से न कृ
च्छ्रेण मुच्यते नात्र संशयः ॥ अथ नमस्कारविधिः ॥ आतुरं न नमेत्प्राज्ञ आतुरो न नमेद्यथा ॥ अत्र संप्रदायविदः ॥ सर्वदा वदनं कुर्याद्गु
रोर्ज्येष्ठ्यतेस्तथा ॥ आपन्नमीं नमस्कुर्याद्दतिक्रांते पि पर्वणि ॥ त्रिमुहूर्तादिकं ग्रासं पर्वक्षौरप्रमाणमयोः ॥ यतिधर्मसमुच्चये ॥ प्र
णतानां यतिर्ब्रूयात्सआयुर्विवृद्धयेदाशिषं व्यासशासनात् ॥ नारायणेति च ब्रूयात्प्रणामायुर्विवृद्धये ॥ धर्मसंकरसंकीर्णे
स्थाने सोपद्रवे यतिः ॥ मुहूर्तं नोपतिष्ठेत यत्र धर्मपराङ्मुखः ॥ तस्करोद्धुते ग्रामे ब्रह्महत्यादिदूषिते ॥ दुर्भिक्षे राष्ट्रभंगे वा वर्षास्वप्याशु
तं त्यजेत् ॥ अत्रिः ॥ पिता माता स्वसा भ्राता स्नुषा जाया सुतस्तथा ॥ ज्ञातिबंधुसुहृद्दुर्गो दुहिता तत्सुतादयः ॥ यस्मिन्देशे वसंस्ते
न तत्र दिवसं वसेत् ॥ दृष्टः शोकोपि वेत्तत्र रागहर्षादयो मलाः ॥ अश्रुपातं यदा कुर्यात्क्रिक् शोकेन चार्दितः ॥ योजनानां शतं गत्वा
तदा पापात्प्रमुच्यते ॥ दक्षः ॥ कथाश्चौरे खले सार्थे पुरे गोष्ठे त्वसद्गृहे ॥ नेकवानां निवसेन यतिः संस्कृतस्थाने घृते पुरे कहिंत ॥ या
ज्ञवल्क्यः ॥ चौरैरुपद्रुतं देशं दुर्भिक्षं व्याधिपीडितं ॥ चक्रेणान्येन वाक्रांतं वर्षास्वप्याशु तं त्यजेत् ॥ मुहूर्तमपि नासीत देशे
सोपद्रवे यतिः ॥ उपद्रुते तु मनसि समाधिर्नैव जायते ॥ अधार्मिकराजग्रामे पाखंडजनसंकुले ॥ मुहूर्तमपि नासीत यत्र धर्मो
विलुप्यते ॥ चतुः क्रोशांतरे यत्र न क्षिप्रवति कुत्रचित् ॥ पक्षांते तत्र गंतव्यं आपस्तंबवचो यथा ॥ श्रोत्रे मिमं त्रितो गच्छे न्नदी

द्वावेतौ न विराजेते विपरीतेन कर्मणा ॥ निरारंभो गृहस्थश्च कार्यवांश्चैव भिक्षुकः ॥ यस्य त्वं न तु भो कव्यं प्राणैः कंठगतैरपि ॥ गोमांससदृ
शं ज्ञेयं स्कराविंदुसमं जलं ॥ गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ॥ उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ माद्यतीं प्रमदां दृष्ट्वा सुरां
पीत्वा च माद्यते ॥ तस्मादृष्टतमां नारीं दूरतः परिवर्जयेत् ॥ न पादपाणिचपलो न नेत्रचपलो द्विजः ॥ न वाक्चपलश्चैव इति शिष्टस्य
परिलक्षणं ॥ उज्ज्वलितस्य वने वह्नेर्दावदग्धासनं स्थितिः ॥ सर्पस्येवाप्यचोरादेः सिंहव्याघ्रादिकस्य च ॥ भयात्र संत्यजेन्मार्गं भियाद्यतिर्विन
श्यति ॥ मोक्षं गच्छत्यसौ विप्रो निर्भयो यस्त्वसंग्रहः ॥ आरुणिश्रुतिः ॥ काम क्रोध लोभ मोह दंभ दर्पासूया मम त्वाहंकारान्ततादींस्त्य
जेत् ॥ अत ऊर्ध्वममंत्रवदाचरेत् ॥ ऊर्ध्वगमनं विसर्जयेत् ॥ काठकब्राह्मणं ॥ सन्यस्याग्नीन्न पुनरावर्तयेन्नापस्यं जायामावाहयेदिति ॥ प
रमहंसउपनिषदि ॥ सो वर्णादीनां नैव परिग्रहेत् ॥ यस्माद्भिक्षुः हिरण्यं रसेन दृष्टं चेत्स ब्रह्महा भवेत् ॥ यस्माद्भिक्षुः हिरण्यं रसेन स्पृ
ष्टं चेत्स पौल्कसो भवेत् ॥ यस्माद्भिक्षुर्हिरण्यं रसेन ग्राह्यं चेत्स आत्महा भवेत् ॥ तस्माद्भिक्षुर्हिरण्यं न दृष्टं च न स्पृष्टं च न ग्राह्यं च सर्वे का
मा मनोगता व्यावर्तेरन् न दुःखेनोद्विग्नः सुखे निस्पृहः त्यागो रागे सर्वत्र शुभाशुभयोरनभिस्नेहः ॥ न द्वेष्टि न मोदं च सर्वेषामिंद्रि
याणां गतिरुपरमेत् ॥ य आत्मन्येवावस्थीयते यः पूर्णानंदैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो भवतीति ॥ मेधातिथिः ॥
शुश्रूषालाभपूजार्थं यशोर्थं वा परिग्रहः ॥ शिष्याणां न तु कारुण्यात्स ज्ञेयः शिष्यसंग्रहः ॥ विद्या दिनं प्रकाशत्वादविद्या रात्रिरु

च्यते ॥ हारीतः ॥ पंडितस्यापि भिक्षुस्य विद्याभ्यासप्रमादेन स दिवास्वाप उच्यते ॥ आध्यात्मिकीं कथां मुक्त्वा भिक्षायां चानरस्तुतिं ॥ अनुग्र
हं पथि प्रश्नं वृथाजल्पो न्य उच्यते ॥ हारीतः ॥ पंडितस्यापि भिक्षुस्य शास्त्रज्ञानरतस्य च ॥ वचनं तस्य न ग्राह्यं शुनोच्छिष्टं हविर्यथा ॥ श्वच
र्मणि यथा क्षीरं अपेयं ब्रह्मवादिभिः ॥ तथा भिक्षुमुखाद्वाक्यं न श्रोतव्यं कदाचन ॥ बह्वृचपरिशिष्टे ॥ यो भवेत्पूर्वसन्यासी तुल्यो वै ध
र्मतो यदि ॥ तस्मै प्रणामः कर्तव्यो नेतराय कदाचन ॥ अत्रिः ॥ छेदभेदोपमर्दं च प्राकारं गृहमाश्रमं ॥ स्वाहा स्वधा वषट्कारो विषयाणां
च संनिधिः ॥ स्तुतिनिंदाक्षेपावादोपरमर्माविघट्टनं ॥ तृष्णा क्रोधो नृतं माया लोभमोहौ प्रियाप्रिये ॥ शिल्पव्याख्यानियोगश्च का
मो रागपरिग्रहः ॥ अहंकारो ममत्वं च चिकित्सा धर्मसाहसं ॥ प्रायश्चित्तं तथा दानं मंत्रौषध्यगदाशिषः ॥ एकान्नं मदमात्सर्यं गंध
पुष्पविभूषणं ॥ तांबूलाभ्यंजने क्रीडा अभ्योगकांक्षा रसायनं ॥ कत्थनं कुत्सनं स्वस्ति ज्योतिषं क्रियविक्रियो ॥ क्रियाकर्म विवादं
श्च गुरुवाक्यविलंघनं ॥ संधिश्च विग्रहो यानं मंचकं शुक्लवाससं ॥ शुक्लोत्सर्गो दिवास्वापो भिक्षाधारस्तु तैजसः ॥ विषं चैवायुधं
बीजं हिंसा तैक्ष्ण्यं च मैथुनं ॥ प्रतिषिद्धानि चैतानि सेवमानो व्रजत्यधः ॥ स्वदेशान्नपश्यति पुत्रमित्रादियोषितां ॥ उपचारकथा
मन्यो मनसापि न चिंतयेत् ॥ आगच्छ गच्छ तिष्ठेति स्वागतं सुहृदे पिवा ॥ सन्मानं च न चैव ब्रूयान्मुनिर्मोक्षपरायणः ॥ न स्नान
न माचरेद्भिक्षुः श्राद्धपिंडोदकक्रियां ॥ त्यक्ते सन्यासयोगेन गृहधर्मादिके व्रते ॥ गोत्रादिचरणं सर्वं पितृमातृकुलं धनं ॥ वा

ष्णुपुराणे॥ दंडं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिंडदः॥ दंडं विष्णुपदे स्पृष्ट्वा पितृभिः सह मोदते॥ गयायां मुंडपृष्ठे च प्रकूपे यूपे वटे तथा॥
दंडं प्रदर्शयेद्भिक्षुः पितृभिः सह मोदते॥ विष्णुः॥ संभाषणं सह स्त्रीभिरालापं प्रेक्षणं तथा॥ नृत्यगानं सभां सेवां परिवादांश्च वर्जये
त्॥ मेधातिथिः॥ न संभाषेत्स्त्रियं कांचित्पूर्वदृष्टां न च स्मरेत्॥ कथां च वर्जयेत्तासां न पश्येल्लिखितामपि॥ एतच्चतुष्टयं मोहात्
स्त्रीणामाचरतो यतेः॥ चित्तं विक्रियते वश्यं तद्विकारात्प्रणश्यति॥ सुजीर्णोपि सुजीर्णासु विद्वान्स्त्रीषु न विश्वसेत्॥ सुजीर्णास्वपि
कंथासु सज्जते जीर्णमंबरं॥ क्रतुः॥ अर्धशय्यासनानां तु वाक्यस्पर्शनभाषणैः॥ याजनाध्यापनं व्याख्या वस्त्रभांडपरिग्रहः॥ मिथु
नेक्षणसंकल्पैः संस्कारास्तु यतेः सदा॥ मेधातिथिः॥ स्थावरं जंगमं बीजं तैजसं विषमायुधं॥ षडेतानि न गृह्णीयाद्यतिर्मूत्रपुरी
षवत्॥ रसायनं क्रियावादं ज्योतिषं क्रयविक्रयं॥ विविधानि च शिल्पानि वर्जयेत्परदारवत्॥ दक्षः॥ भयं प्राणांतिके मुक्त्वा विण्मू
त्रोत्सर्ग एव च॥ नान्यत्र विचरेद्रात्रौ न मध्याह्ने न संध्ययोः॥ मनुः॥ नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः॥ जानन्नपि हि
मेधावी जडवल्लोकमाचरेत्॥ बृहस्पतिः॥ नैवाददीत पाथेयं यतिः किंचिदनापदि॥ पक्वमापद्गतो गृह्णीयाद्यावदन्नं प्रभुज्यते॥
पाथेयं एकरात्रस्य पानीयं दुर्गमे पथि॥ गृह्णीयान्नाधिकं चान्नं भेषजं तु यथेच्छया॥ विष्णुपुराणे॥ जरायुजांडजादीनां वाङ्मनः
कर्मभिः क्वचित्॥ युक्तः कुर्वीत न द्रोहं सर्वसंगांश्च वर्जयेत्॥ अत्रिः॥ न चैकस्मिन्वसेद्ग्रामे न चैकस्मिन्सरित्तटे॥ शून्यागारे न चै

गपदं गुरुः॥ पादौ मृदा त्रिः प्रक्षाल्य पादुकाभ्यां गृहं व्रजेत्॥ द्विगुणं कटिसूत्रं च बध्वा वासो बहुं च च॥ उच्चासनं प्रकल्प्याथोपविशेत्तत्राज्ञ
या गुरोः॥ साध्यादिष्टमुपन्यस्य वेदांते किंचिदेव तु॥ गुरुणा विधिवन्न्यासः पूर्वशंखाभिषेचनं॥ वासो माल्यादिकं दत्वा गुरुणा यतिभिः
सह॥ गीताध्यायं विश्वरूपं भुंक्ष्वराज्यांतमेव च॥ ततो नाम प्रकर्तव्यं गुरुणा सर्वसंमतं॥ तीर्थाश्रमवनारण्यगिरिपर्वतसागराः॥ स
स्वती भारती चैव पुरी नामानि वै दश॥ श्रीपादसंज्ञया वाच्यं नाम तस्य यथातथं॥ उपचारं तस्य या कार्यं दीक्षाव्याख्यादिकं तथा॥ योग
पट्टोपि दातव्यः शिष्ये सम्यक्परीक्षिते॥ दत्वा तद्गुरुणा दत्तं गृहीत्वा शिरसा स्वयं॥ उत्थाय च ततः सम्यक् कुर्यात्पादग्रहान्वितं॥
सदेरकं नमस्कुर्यात् गुरुर्ज्येष्ठयतींस्तथेति॥ इति योगपट्टविधिः॥ आगतस्वाश्रमे भिक्षुं प्रक्षाल्य पादाभिवंद्य च॥ विश्राम्य गुरुवद्
भक्त्या संपूजयेत्तद्दिने यतिः॥ अथाभिवाद्यानि॥ नाम गोत्राद्याचरणं देशं कालं श्रुतं कुलं॥ वयो वृत्तं व्रतं शीलं ख्यापयेन्नैव सद्यतिः॥
विष्णुपुराणे॥ द्वावेतौ समवीर्यौ तु सुरा तांबूलमेव च॥ तस्मात्सर्वप्रयत्नेन तांबूलं वर्जयेद्यतिः॥ व्यासः॥ मा ददस्वेति यो ब्रूयाद्गव्य
ग्नौ ब्राह्मणेषु च॥ श्वानयोनिशतं गत्वा चांडालेष्वपि जायते॥ यः प्रदत्तां श्रुतिं सम्यक् शास्त्रं च ऋषिभाषितं॥ दूषयेद्दानभिज्ञो यः स
भवेद्ब्रह्मघातकः॥ यतीनां कांचनं दद्यात्तांबूलं ब्रह्मचारिणां॥ चोराणामभयं दद्यात्स नरो नरकं व्रजेत्॥ दशविधां हिंसामपि न कु
र्यात्॥ उद्वेगजननं संतापजननं रुजाकरणं शोणितोत्पादनं पैशून्यकरणं सुखापनयनं मतिक्रमः॥ संरोधो निधनं वधश्चेति॥

नः॥ चांडालगर्भसंभूतो जायते नात्र संशयः॥ क्रमेण लभते मोक्षं तु लक्ष्यो त्सादनेन च॥ अंगिराः॥ न तीर्थसेवी नित्यं स्यान्नो
पवासपरो यतिः॥ न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत्॥ न किंचिद्भेषजादन्यन्न चान्यद्दंतधावनात्॥ विनाभो
जनकाले तु भक्षये दात्मवान् यतिः॥ यतिधर्मविहीनस्तु संसारान्न निवर्तते॥ हर्षक्रोधौ न कुर्वीत भनः शूलं समाचरेत्॥ प्रति
न वर्जयेत्॥ दत्तात्रेयः॥ जायाभ्रातृसुतादीनां बंधूनां च शुभाशुभं॥ श्रुत्वा दृष्ट्वा न कंपेत शोकहर्षौ त्यजेद्यतिः॥ हारितः॥
छेदनभेदने पाके यतिर्यस्तु प्रवर्तते॥ तादृशां कश्मलं दृष्ट्वा व्रतशौचं विधीयते॥ तिलधान्यहिरण्यं च गोभूदासीगृहादिकं॥
तद्दाय निषिद्धं तु योऽश्नुते न त्यजेद्यतिः॥ स साधुभिर्बहिः कार्यः स्मृतो सोऽपतितो यतिः॥ तं दृष्ट्वाभिन्नमर्यादं स्नानं कु
र्यात्सहांबरं॥ अंगिराः॥ संन्यासं चैव यः कृत्वा पुनरुत्तिष्ठते द्विजः॥ न तस्य निष्कृतिः कार्या स्वधर्मात्प्रच्युतस्य च॥
विष्णुः॥ आरूढो नैष्ठिकं धर्मं पुनरावर्तयेद्यदि॥ आरूढपतितो ज्ञेयः सर्वधर्मबहिष्कृतः॥ स निंद्यः सर्वभूतानां पित
घ्नश्चैव जायते॥ चांडालाः प्रत्यवसिताः परिव्राजकतापसः॥ तेषां जातान्यपत्यानि चांडालैः सह वासयेत्॥ नैष्ठिका

नां वनस्थानां यतीनां मवकीर्णिनां॥ शुद्धानामपि लोकेस्मिन्न मत्यापतितैर्न विद्यते॥ बहिस्तूमयथावापि स्मृतेराचाराद्धोभयथापि कृ
तप्रायश्चित्ता असंकृतप्रायश्चित्ताश्चैते साद्भिः सहाध्यायनाशनादि व्यवहारार्हा न्यैव इति कुतः॥ यतः प्रायश्चित्ते निरस्यैतपारलौकि
कशुद्धता॥ नेहीकी वचनान्यायवाधो बालवधादिकवत्॥ मनुः॥ बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः॥ शरणागतहंतृ
स्त्रीहंतृंश्च न संवसेदिति॥ नभोजनादि सर्वव्यवहारमाचरेत् इत्यर्थः॥ आविकं त्वाधिकं वस्त्रं तूलीतूलपटीं तथा॥ प्रतिगृह्णाति यश्चैव पत
ते नात्र संशयः॥ उत्तमां वृत्तिमाश्रित्य पुनरावर्तयेद्यदि॥ आरूढपतितो ज्ञेयो सर्वधर्मबहिष्कृतः॥ वेदत्रयपरिशिष्टे॥ पतत्यसो ध्रुवं क्षि
क्षुर्यस्य भिक्षोर्द्वयं भवेत्॥ धीपूर्वं रेतउत्सर्गो द्रव्यसंग्रह एव च॥ कांचनं च तिला गावो भूमिधान्यधनं स्त्रियः॥ प्रतिगृह्णाति यश्चैता
न्यतत्येव न संशयः॥ भूमिर्गावो हिरण्यं च यतेर्यस्य परिग्रहः॥ तादृशं कश्मलं दृष्ट्वा सचेलजलमाविशेत्॥ अभयं सर्वभूतेभ्यो द
त्वा यस्तु निवर्तते॥ हंति जातानजातांश्च प्रतिगृह्णाति यस्य च॥ दिवास्वप्नं च यानं च स्त्रीकथा लौल्यमेव च॥ मंचकः शुक्लवास
श्च यतीनां पतनानि षट्॥ अन्नदानपरो भिक्षुश्चत्वारो हंति दानतः॥ दातारमन्नमात्मानं यस्मै चान्नं प्रयच्छति॥ क्रतुः॥ मा
धूकरं समीहत्य ब्राह्मणेभ्यो ददाति यः॥ स याति नरकं विप्रो भोक्ता चांद्रायणं चरेत्॥ कात्यायनः॥ द्रव्यस्त्रीमांससंपर्कान्म
धु मक्षिकलेहनात्॥ स्त्रिया रस्य परित्यागाद्यतिः पतनमिच्छति॥ व्यासः॥ क्रोधलोभपरो नित्यं निद्रालस्यपरस्तथा॥ विवादी

विश्वेश्वरी

छापरत्र्ध्यैव श्रेयसोऽत्र स्यते द्विजः ॥ दक्षः ॥ परिव्राज्य प्रव्रज्य गृहीत्वा लुपः स्वधर्मे न तिष्ठति ॥ श्वपदेनांकयित्वा तं राजा शीघ्रं प्रवासये
त् ॥ क्रतुः ॥ वीजप्रं तैजसं पात्रं भुक्तो स्वर्गे स्तितां वरं ॥ निश्रः लं चाप्याप्य स्वधर्मं यतीनां पतनानि षट् ॥ दासीदाससंग्रहं यानं गोभूध्या
न्यधनं रसान् ॥ प्रतिग्रहं यतिर्गृह्णन् महत्या कुलशतत्रयं ॥ आविकं पादुकं मांसं तूलिकं मधुमंचकं ॥ भुंक्ते वस्त्रं च यानं च तां ब्रूलेह्नि
यमेव च ॥ प्रतिग्रहं कुलं हन्यात् प्रतिगृह्णाति यस्य च ॥ पुष्पं शाखो पल्लवं वा फलमूल तृणादिकं ॥ शुल्कानु यस्तु संन्यासी नरके पति
तं ध्रुवं ॥ यः स्वधर्मं परित्यज्य यदन्यत् कुरुते द्विजः ॥ न तस्य निष्कृतिः कार्या स्वधर्मात् प्रस्खलितो हि सः ॥ अंगिराः ॥ आरूढपतितो
हे तिरस्कृतान् पूर्वान् दशापरान् ॥ निस्तारयति तानेव यदि सम्यग्व्यवस्थितः ॥ क्षेत्रं गावो हिरण्यं च यतिर्यस्य परिग्रहः ॥ तादृशं कश्मलं दृ
ष्ट्वा सचेलो जलमाविशेत् ॥ विधवां कंचुकोपेतां सधवां कंचुकं विना ॥ यतिं च कंचुकोपेतं दृष्ट्वा चक्षुर्निमीलयेत् ॥ चत्वारि पतनी
यानि यतीनां मनुरब्रवीत् ॥ भेषज्यं सन्निधानं च एकान्नं कांस्यभोजनं ॥ एकान्नी द्विजनी चैव भेषजी वस्तुसंग्रही ॥ चत्वारो नर
कं यांति मनुः स्वायंभुवोऽब्रवीत् ॥ इति संन्यासीनां त्याज्य विधिः ॥ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

कस्मिन् वसेच्छून्यालये तथा ॥ लोकयात्राप्रयत्नेन वर्जयेदात्मचिंतकः ॥ नान्योपनिषदं विद्यां उपासे मुक्तिहेतुकीं ॥ प्रासादा
च्छादनादन्यन्न गृह्णीयात् कथंचन ॥ यावदाहरयेत्तावत्प्रतिगृह्णीत नान्यथा ॥ परार्थं न प्रतिग्राह्यं न च दद्यात्कथंचन ॥ दैन्यभा
वात्तु भूतानां संविभागं यतिश्चरेत् ॥ क्रतुः ॥ निरुजश्च युवा चैव भिक्षुर्नावसथे वसेत् ॥ स दूषयेति तत्स्थानं द्वान्नपीडय
तीति च ॥ मनुः ॥ अतिवादांस्तितिक्षेत नावमन्येत केचन ॥ न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ क्रुध्यंतं न प्रतिक्रुध्ये
दाक्रुष्टः कुशलं वदेत् ॥ सप्तद्वारावकीर्णं च न वाचमनृतं वदेत् ॥ अत्रिः ॥ पक्वं वा यदि वापक्वं याचयेद्यः क्वचिद्यतिः ॥ स
धर्मलोपेन तिर्यग्योनिं व्रजेद्यतिः ॥ जाबालिः ॥ अन्नदानपरो भिक्षुर्वस्त्रादीनां परिग्रही ॥ उभौ तौ मंदबुद्धी स्यात्तु प्र
तीनरकशायिनो ॥ वायुपुराणे ॥ यस्तु प्रव्रजितो भूत्वा पुनः सेवेत मैथुनं ॥ षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥ शू
न्यागारेषु घोरेषु आखुर्भवति दारुणः ॥ स तिर्यक्त्वात्ततो गृध्रः श्वा वै द्वादश वत्सरान् ॥ खरो विंशतिवर्षाणि दशवर्षाणि
पि भूकरः ॥ अपुष्पो फलितो वृक्षो जायते कंटकान्वितः ॥ ततो दवाग्निना दग्धः स्थाणुर्भवति कामुकः ॥ स्थावरान्सं
परित्यक्तो योनिमन्यां स गच्छति ॥ पूर्वं वर्षसहस्रां ते जायते ब्रह्मराक्षसः ॥ क्षुत्पिपासापरिश्रांतः कव्यादो रुधिराश

चतन्मयं ॥ ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो विदुः ॥ इदं यज्ञोपवीतं च परमं यत्परायणं ॥ विद्वान्यज्ञोपवीती स्यात्तय
ज्ञस्तं यजिनं विदुः ॥ इदमेवास्य तत्त्व यज्ञोपवीतं यदात्मध्यानविद्याविशिखा नरैः ॥ सर्वत्रावस्थितं यन्निवर्तयेदिति ॥ अथ
ब्राह्मे मुहूर्ते उत्थाय भगवंतमात्मनस्मृत्वा मूत्रपुरीषोत्सर्गं विधिवत्कुर्यात् ॥ तत्र बह्वृचपरिशिष्टे ॥ ततस्तु दि-
शि नैरृत्यां कृत्वा उदङ्मुखः ॥ अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससः ॥ वाचं नियम्य यत्नेन नष्ठीवनश्वासव
र्जितः ॥ कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहित इति ॥ कर्णस्थब्रह्मसूत्र हस्तादिविषयं ॥ अन्यत्साधा
रणं नैरृत्यां ज्ञेयः ॥ तृणग्रहणमुपलक्षणार्थं ॥ तिरस्कृत्योच्चरेत्काष्ठं पत्रं लोष्ठं तृणानि वा ॥ नियम्य प्रयतो
वाचं संवीतांगोऽवगुंठितः ॥ उभे मूत्रपुरीषे तु दिवा कुर्यादुदङ्मुखः ॥ रात्रौ तु दक्षिणे कुर्यात्तथा संध्ये दिवा
यथा इति ॥ प्रत्यादित्यं प्रत्यनिलं प्रतिगां चाप्रति द्विजान् ॥ मेहंति ये च पथिषु ते भवंति गतायुषः ॥ न मू
त्रमेहनं कुर्याद्भस्मनि गोमये तथा ॥ उपजीव्यस्तीयान्नो चैव गोष्ठे नाग्नौ न शाड्वले ॥ शतहस्तं परित्यज्य मूत्रं कु
र्याज्जलाशयात् ॥ शतद्वयं पुरीषे तु तीर्थे चैव चतुर्गुणं ॥ छायायामंधकारे वा रात्रावहनि वा द्विजः ॥ यथा

सुखं मुखं कुर्यात्प्राणबाधाभयेषु च ॥ यावत्क्लृप्तः ॥ गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः ॥ गंधलेपक्षयक
रं शौचं कुर्यादतंद्रितः ॥ उद्धृताभिरिति जलांतः शौचनिषेधः ॥ अथ गंधलेपक्षयकरमिति सर्वाश्रमिणां साधार
णमिदं शौचं मृत्संख्यादिनियमस्त्वदृष्टार्थः ॥ भारद्वाजः ॥ अपकृष्य च विण्मूत्रे काष्ठलोष्ठतृणादिना ॥ उद
स्तवाससा उत्तिष्ठेद्दृढं विधृतमेहनः ॥ अत्रिः ॥ शौचार्थं च त्रिभिः काष्ठैस्तृणैर्वापि निकर्षयेत् ॥ यस्मिन्देशे च य
त्तोयं यातयत्र च मृत्तिका ॥ सेवतत्र प्रशस्ता स्यात्तया शौचं विधीयते ॥ विष्णुपुराणे ॥ वल्मीकमूषकोत्खातां
तां मृदं चांतर्जलात्तथा ॥ शौचावशिष्टां गेहाच्च मृदं शौचे विवर्जयेत् ॥ विष्णुः ॥ अंतःप्राण्यवपन्नां च हलो
त्खातां च नाहरेत् ॥ आहृतामन्यशौचार्थं वालुकां पांशुरूपिणीं ॥ न मार्गान्न श्मशानाच्च नादेयात्कु
ड्यतः क्वचित् ॥ यमः ॥ आहरेन्मृत्तिकां प्राज्ञः कूलात्ससिकतां तु या ॥ कूलग्रहणमुपलक्षणं ॥ शुचि
देशाच्च संग्राह्या शर्करास्मादिवर्जिता इति ॥ कपिलः ॥ चतुरंगुलमृत्तिखननपरिग्रहेन दोष इति यमः उभे
मूत्रपुरीषे तु पूर्वं गृह्णीत मृत्तिकां पश्चाद्धस्तौ तु यो विप्रः सचैलो जलमाविशेत् ॥ तीर्थे शौचं न कुर्वीत कुर्वी

ताह्लवारिणा पैठीनसः अनूदके मूत्रपुरीषकरणे सचैलस्नानमिति उदकपात्राभावे तीर्थे पि शौचं
मुक्तं मार्दिसपुराले रत्निमात्रे जलं संत्यक्त्वा कुर्याच्छौचमनुद्धृतैः पश्चाच्छुद्धे ध्ये तीर्थे मन्यथा न शुध्यति ने
स्तु। मनुः ॥ यावन्नापैत्यमेध्याक्तो गंधलेपश्च तत्कृतः ॥ तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिषु ॥ उद्धृ
ताभ्यां जलाभ्यां च गंधलेपक्षयं करं ॥ शौचं विधाय दृष्टार्थं कुर्यात् ॥ शातातपे ब्रवीत् ॥ एका लिंगे करे
तिस्रः सव्ये द्वे हस्तयोर्द्वयोः ॥ मूत्रशौचं समाख्यातं शुक्रे तु द्विगुणं स्मृतं लक्षणं ॥ लिंगे च मतसमाख्याता त्रि
पर्वं पूरयति यथा ॥ दाल्भ्य सुदर्कंता वन्मृद भावो यथा भवेत् ॥ एका लिंगे तिस्रो वामे उभये द्वे मृत्तिके ॥ पं
चापुदे पाने दश शौच स्मिन् उभयो सप्त मृत्तिका ॥ एतत्तु शौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः ॥ त्रिगुणं वान
प्रस्थस्य यतीनां तु चतुर्गुणं ॥ अर्धप्रसृतिमात्रा च प्रथमा मृत्तिका स्मृता ॥ द्वितीया च तृतीया च तदर्धा
प्रकीर्तिता ॥ वामे करे मृदो देया दर्धा मलकसंमिताः ॥ उभयोर्हस्तयोर्देया दश मलकसंमिताः ॥
मनुः ॥ एका लिंगे करे तिस्रस्तथैकत्र करे दश ॥ उभयोः ॥ सप्तदातव्या मृदः शुचिमभीप्सता ॥ एतत्

श्रीगणेशाय नमः ॥ ॥ मनुरपि ॥ अमुक्तयोरस्तगतयोर्दृष्ट्वा स्नात्वा परेहनि ॥ विष्णुधर्मोत्तरेपि ॥ अहोरात्रेन भोक्तव्यं स्नानं कृ
त्वा ततः परं ॥ इतीदमपि यस्तास्तविषय ॥ चंद्रसूर्यग्रहे नाद्यात्तस्मिन्नहनि पूर्वतः ॥ राहोर्विमुक्ते स्नात्वाय स्नानं कुर्वीत भोज
नं ॥ गालवोपि ॥ यस्त्रिरात्रमुपोष्य च ग्रहणे चंद्रसूर्ययोः ॥ स्नात्वा दत्वा च विधिवन्मोदते ब्रह्मणा सह ॥ एकरात्रमुपोष्य वा स्ना
त्वा दत्वा च शक्तितः ॥ कंचुकादिव सर्पस्य निर्मुक्तः पापकंचितः ॥ आदित्ये हनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः ॥ नोपवा
संगृही कुर्यात्पुत्रदारधनक्षयः ॥ सायान्हे संगवश्रीयाच्छारदे सगवाद्द्यः ॥ मुख्यान्हे पतो श्लीयान्नोपवासस्य विग्रह ॥ न
नु अस्ति चेदाश्रमो चित्तधर्मेष्वधिकारो यते स्तर्हि तदं गस्ताभ्यां शिखायज्ञोपवीताभ्यां भवितव्यमेव ॥ मैवं ॥ बहिस्त्य
क्तशिखायज्ञोपवीतानामभावेपि सामगब्रह्मचारिणः शिखाभावेपि वचनात् ॥ कर्मण्यधिकार व दधिकारो पपतेः ॥ आं
तरशिखायज्ञोपवीतसंभवाच्चाक्षेत्रेव ॥ तथा चाथर्वतिः ॥ ज्ञानशिखा ज्ञाननिष्ठा ज्ञानयज्ञोपवीतिनः ॥ ज्ञानमेव
परं तेषां पवित्रं ज्ञानमुच्यते ॥ अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखा स शिखीत्युच्यते विद्वान्नेतरे केशधा
रिणः ॥ तथा वारुणि श्रुतिः ॥ खल्विह ते ब्रह्मसूत्रं ॥ सूचनात् सूत्रं ॥ ब्रह्मसूत्रमहमेवेति ॥ विद्वांस्त्रिवृत्सूत्रं स जेद्वि
द्वान्य एवं वेदेति ॥ अत्रिः ॥ ज्ञानशिखा ज्ञाननिष्ठा ज्ञानयज्ञोपवीतिनः ॥ ज्ञानमेव परं तेषां पवित्रं कायशोधनं ॥ भांवं
मैत्रायणि श्रुतिः ॥ अथ यज्ञोपवीती शौचनिष्ठः कल्माषवेणवदंडमादधीतेति ॥ शिखा ज्ञानमयी यस्य उपवीत

विश्वे

चांतः शुध्येदिति॥ ततो धौतं कौपीनं परिधाय द्वादश गंडुषपूर्वकमाचम्य षट् प्राणायामान् कुर्यात्॥ तथा संप्रदायवि

द्वचनं॥ वासित्वा धौतकौपीनं गंडूषान् द्वादशांश्चरेत्॥ आचम्य प्रयतो भूत्वा प्राणायामान् षडाचयेत्॥ केवलेलघुशौ

चे विशेषः॥ षट् गंडुषांस्ततः कृत्वा प्राणायामत्रयं चरेत्॥ अथ दंतधावनविधिः॥ वृद्धशातातपः॥ मुखेपर्युषितेनि

त्यं भवत्यप्रयतो नरः॥ तस्मात्सर्वप्रयत्नेन भक्षयेद्दंतधावनं॥ अप्रयतोऽशुचिः॥ भक्षयेदिति दंतसंबंधादुपचारेण

दंतान् घर्षयेदित्यर्थः॥ अन्ये तु॥ भक्षयेच्चैव येन मुख्यार्थबाधकाभावात्॥ भक्षणं च दंतकाष्ठाग्रस्य प्रसिद्धं॥ सि

थिलावयवतापादानपर्यंतं न तु निगिरणं॥ तथा च विष्णुः॥ कनिष्ठाग्रसमस्थौल्यं सकूर्चं द्वादशांगुलं॥ प्रातर्भु

क्त्वा च यतवाक् भक्षयेद्दंतधावनं॥ सकूर्चं चूर्णिकृताग्रं यथा भवति तथा भक्षयेदित्यर्थः॥ एतच्च दंतधावनं॥ प्रातः

संध्यायाः प्रागुपस्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः॥ परिजप्य च मंत्रेण भक्षयेद्दंतधावनं॥ नारदः॥ खदि

रश्च करंजश्च करवीरकदंबकौ॥ सर्वे कंटकिनः पुण्याः क्षीरिणश्च यशस्विनः॥ जंबुनिंबकचूतांश्च कदंबोतो ध

श्वरी २

चंपकः॥ बदरीकं दुकस्त्वेते प्रशस्ता दंतधावने॥ कोविदारः कदंबश्च कुटजः प्लक्षमालती॥ शालां कोलः प्रियंगुश्च

तमालः शाक एव च॥ आम्रातकोरिमेदश्च प्रशस्तान्येपि ये द्रुमाः॥ वर्ज्यानि शाल्मलीपीलुभव्यापिंशुकतिंदुकः॥ अरि

ष्टाक्षः पारिभद्रो गुग्गुलुस्तित्तिडी तथेति॥ विहितानामलाभे अनिषिद्धा एव ग्राह्या न तु निषिद्धाः परिमाणमुक्तं नरसिंह

पुराणे॥ अंगुष्ठांगुलिनमानेन तत्प्रमाणमिहोच्यते॥ प्रादेशमात्रमथवा तेन दंतान् विशोधयेत्॥ विष्णुः॥ द्वादशांगु

लकं विप्रैः काष्ठमाहुर्मनीषिणः॥ क्षत्रविट्शूद्रजातीनां नव षट् चतुरंगुलं॥ कंटकीक्षीरवृक्षोत्थं द्वादशांगुलमव्र

णं॥ कनिष्ठिकाग्रवत्स्थूलं कूर्चाग्रं सत्वकं पूर्वकं॥ दंतधावनं चाग्रे नैव कर्तुं मसत्वचं दंतकाष्ठं स्यात्॥ तदग्रेण प्रधाव्ये

दिति वचनात्॥ परिजप्य च मंत्रेण इत्युक्तत्वात्॥ ब्रह्म प्रज्ञानं मेधां च त्वन्नो देहि वनस्पते॥ इत्यनेन वा प्रणवेन वा का

ष्ठमभिमंत्र्य दंतधावनं कुर्यात्॥ प्राङ्मुखश्चोपविष्टश्च भक्षयेद्वाग्यतो नरः॥ प्रक्षाल्य च शुचौ देशे दंतधाव

नं समुत्सृजेत्॥ प्रक्षाल्य भक्षयेत्पूर्वं प्रक्षाल्यैव च संत्यजेत्॥ अमां वर्जयित्वा दंतधावनं कार्यं सदा॥ अमावा

स्यामृते प्रातर्भक्षयेद्दंतधावनं ॥ अमावास्यां तु नाश्नीयात् दंतकाष्ठं कथंचन ॥ नरसिंहपुराणे ॥ अलाभे दं
तकाष्ठस्य प्रतिषिद्धे तथा दिने ॥ अपां द्वादशगंडूषैर्मुखशुद्धिर्भविष्यति ॥ वृद्धयाज्ञवल्क्यः ॥ इष्टकालोष्ठपाषाणै
र्नखरंगुलिभिस्तथा ॥ मुक्ताभ्यानामिकां गुष्ठौ वर्जयेत् दंतधावनं ॥ यमः ॥ मध्याह्नस्नानवेलायां यो भक्षेद्दंत
धावनं ॥ निराशास्तस्य गच्छंति देवताः पितृभिः सह ॥ एवं दंतधावनं विधाय द्वादशभिर्गंडूषैर्मुखं शोधयेत् ॥ ततो
भस्मस्नानं कृत्वा वासुदेवं विचिंतयेत् ॥ उक्तं च शिवगीतासु ॥ मदात्मा मन्मयो भस्म गृहीत्वा ह्यग्निहोत्रजं ॥ ते
नाधूल्यं तु सर्वांगं अग्निरित्यादिमंत्रतः ॥ चिंतयेत्स्वात्मनीशानं परं ज्योतिः स्वरूपिणं ॥ एष पाशुपतो योगः पशुपा
शविमुक्तये ॥ अग्निरिति भस्म ॥ वायुरिति भस्म ॥ जलमिति भस्म ॥ स्थलमिति भस्म ॥ व्योमेति भस्म ॥ सर्वं ह वा
इदं भस्म मन एतानि चक्षूंषि भस्मानीत्यपि मंत्र्य ॥ प्रणवेन सर्वांगेषु निक्षिपेत् ॥ तत्रारुकर्णिश्रुतिः ॥ त्रिसंध्यादौ
स्नानमाचरेत् ॥ संध्यासमाधायासन्याचरेदिति ॥ व्यासः ॥ प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः ॥ ति

शौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां ॥ त्रिगुणं तु वनस्थानां यतीनां च चतुर्गुणं ॥ अत्र वसिष्ठेन शौचमुक्तं वेदितव्यं ॥ तत्त
श्चाश्रमभेदेन द्वैगुण्याद्यभिधानं तद्विषयमेव एतदिति सर्वनाम्ना प्रकृतस्यैव परामर्शात् ॥ द्विगुणादिच संख्यापेक्षं न
परिमाणापेक्षं तस्या एव प्रकृतत्वात् ॥ पादशौचं एवैकमृदैकैव पादयोर्देयेति ॥ ब्रह्मपुराणे वचनात् ॥ यत्तत्र हारीतवचनं
॥ तिसृभिः पादौ प्रक्षालयेदिति ॥ तल्लेपगंधक्षयार्थमिति वेदितव्यं ॥ पंचापानेऽइत्यादिसंख्याविशेषपक्षो शक्त्यपेक्षया विक
ल्पितो वक्तव्यो ॥ मूत्रशौचं पुराकृत्य वक्ष्यच्छौचं समाचरेत् ॥ पश्चाच्च पादशौचं तु शौचविधिरुदाहृतः ॥ शौचे यत्नः स
दा कार्यः शौचमूलो द्विजः स्मृतः ॥ शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः ॥ न्यूनाधिकं न कर्तव्यं शौचं शुद्धिम
भीप्सता ॥ दक्षः ॥ यद्दिवा विहितं शौचं तदर्द्धं निशि कीर्तितं ॥ तदर्द्धमातुरे प्रोक्तं आतुरस्यार्द्धमध्वनि ॥ देवलः ॥ धर्मवि
दक्षिणं हस्तमधः शौचे न योजयेत् ॥ तथैव वामहस्तेन नाभेरूर्ध्वं न शोधयेत् ॥ ततो मूत्रपुरीषस्य लेशापनोदाय कृ
शौचं कुर्यात् ॥ तत्र विष्णुः ॥ नाभेरधस्था द्वाह्वषु च कायकैर्मलैः ॥ सुराभिर्मद्यैर्वा पहतो मलैर्यैस्तदंगं प्रक्षाल्य

जपेत्॥शयनादुत्थितो यस्तु कीर्तयेन्मधुसूदनं॥ कीर्तनात्तस्य पापानि नाशमायांत्यशेषतः॥अथ दंडमुद्रासहितं गृही
त्वा स्नानार्थं गच्छेत्॥तथा च संप्रदायविदः॥नागमुद्रा त्वधोभागे धेनुमुद्रा तु मध्यतः॥तृतीये दंडभागे तु धार्या पर
शुमुद्रिका॥तस्या उपरि संधार्या शंखमुद्रा तु वैष्णवी॥ धेनुमुद्रायां विशेष उक्तः॥भागद्वयं विहायोर्ध्वं चतुरंलघु
मानतः॥दंडं कार्पाससूत्रेण वेष्टयेत्संप्रदायइति॥ एवंविधं दंडं दक्षिणकरे गृहीत्वा॥वामांसे वस्त्रं कृत्वा गुरोर्द
क्षिणभागे स्थित्वा गुरुमभिवंद्य तदनुज्ञां प्राप्य गच्छेत्॥उक्तं च अभिवंद्य गुरून् ज्येष्ठान्देवादीन् परिगृह्य च॥
द्वाराद्बहिर्वामपादो दंडमूलं पुरो दधत्॥ततो निर्गत्य विप्रादीन्दृष्ट्वा दक्षिणतो व्रजेत्॥ततो जलाशयं गत्वा गुरू
न् ज्येष्ठान् विलोक्य च॥तेषामधः प्रदेशे तु शुचौ देशे कमंडलुं॥संस्थाप्य वामवस्त्रं च कृत्वा विस्रंसमरेज्जले॥
ततो दंडस्य मूलेन तथाग्रेण स्पृशेज्जलं॥कुर्याज्जलस्य च दिशां दिशानां वंदनं क्रमात्॥ततो गुरूणां ज्येष्ठानां
यतीनां वंदनं क्रमात्॥ततः संस्थापयेद्दंडं तूर्ध्वाग्रं जलमध्यतः॥अथ वा शुचिवस्त्रादौ स्थापयेत्प्रागुदङ्मुखं॥

ततो मृदं समानीय यथोक्तं शुचिदेशतः॥प्रक्षाल्य तत्तीरे संस्थाप्य कुर्याद्भागत्रयं ततः॥तत एकेन भागेन पादशौचं
समाचरेत्॥आचम्यान्येन भागेन कटिशौचं समाचरेत्॥जलांतस्तिसृभिर्मृद्भिः कटिं प्रक्षालयेत्ततः॥कौपीने ति
सृभिर्मृद्भिः पुटे प्रत्येकमेव तु॥गृहस्थस्य तु यच्छौचं तत्कार्यं यतिना ततः॥आचम्य विधिना पश्चात्प्राणायामत्र
यं चरेत्॥ततः प्रक्षालयेत्सम्यक् मृज्जलाभ्यां कमंडलुं॥वामहस्तस्य पृष्ठे तु संस्थाप्य स्नानमृत्तिकां॥दंडं कमं
डलुं चैव स्पृष्ट्वा चामे यथाविधि॥वामवस्त्रं ततो दंडे स्थाप्यं यद्वा शुचिस्थले॥दक्षिणे स्नानमृदं संस्थाप्य विभजेत्त्रि
धा॥चुलुके जलमादाय तद्वामेन विधाय च॥प्रणवेन द्विषड्वारमभिमंत्र्य च तेन तां॥संप्रोक्ष्य प्रणवेनैव द्विषड्वे
नाभिमंत्रयेत्॥ततः प्रथमभागं तु गृहीत्वा स्वल्पकां मृदं॥करावलिप्य सूर्याय प्रदर्श्य तु क्षालयेत्करौ॥पुनः
किंचित्समादाय हस्तयोरुपलिप्य च॥सूर्याय दर्शयित्वोर्ध्वमुखं कक्षे विलेपयेत्॥जलेनाधोमुखं कक्षौ समा
लिप्य जलं स्पृशेत्॥एवं वारत्रयं कुर्यात्कक्षयोरुपलेपनं॥द्वितीयं किंचिदादाय हस्तयोरुपलिप्य च॥सूर्याय

प्रदर्शयित्वा तु लिपेद्भालं भुजौ हृदं ।। पुनश्चैव समादाय पृष्ठमारभ्य लेपयेत् ।। जलं स्पृशेत्ततश्चैव किंचिदादाय मृत्ति
कां ।। हृदयमारभ्य चानाभेरालिप्य सलिलं स्पृशेत् ।। आपादात्तु जलं स्पृष्ट्वा दक्षिणेन करेण तु ।। तृतीयं भागमादा
य वामेनोरू विशोधयेत् ।। गंगायां तन्मुखोऽन्यत्र सूर्यदेवादिसन्मुखः ।। यस्य प्रसादादित्यादिमंत्रेण त्रिर्नमेद्गुरुं ।।
ततो दक्षिणभागे तु स्थित्वा वंदेत तं गुरुं ।। ज्येष्ठानां वंदनं कृत्वा ज्येष्ठानुक्रमतः पुनः ।। ततः स्नानं दक्षिणे कृत्वा वा
महस्तेन दक्षिणं ।। पादं स्पृष्ट्वा विशेत्तोयं नाभिदघ्नं शनैः शनैः ।। प्रवाहे विप्र गुदङ्मुखः ।। प्रवाहाभिमुखो नद्यां
मन्यत्र रविसन्मुखः ।। त्रिर्निमज्ज्य मृदं स्कंधसंस्थां प्राप्य प्रागुदङ्मुखः ।। आचम्य द्विस्त्रिः राचम्य प्रणवैः मंत्रैश्च प्रो
क्ष्य मृत्तिकां पूर्ववत्तां च स्कंधादादाय हस्तयोः ।। उपलिप्याथ सूर्याय चक्षुषोर्वा प्रदर्शयेत् ।। ललाटबाहुहृदयं क्रमेणैव वि
लेपयेत् ।। एवं वारत्रयं कृत्वा गृहीत्वा शेषमृत्तिकां ।। प्रणवेनाप आलोड्य कुर्यात्तु षड्वारमज्जनं ।। द्विराचम्य त्रिराचम्य
प्राणान्यच्छेद्यथाविधि ।। न्यासादि कृत्वा प्रणवं जपेदष्टोत्तरं शतं ।। अथवापि यथाशक्तिस्तथा ब्रह्मानुचिंतयेत् ।।

क्षुण्णं त्रिषवणं प्रोक्तमेकं तु ब्रह्मचारिणः ।। सर्वेचापि सत्त्वकूर्पुरशक्तौ चोदकं विना ।। आसिरस्कं भवेत्स्नानमशक्तौ
कर्मणां सदा ।। आर्द्रेण वाससा वापि पाणिना वापि मार्जनं ।। चतस्रो घटिकाः प्रातररुणोदय मुच्यते ।। यतीनां स्ना
नकालोऽयं गंगांभः सदृशः स्मृतः ।। उषस्यूषसि यत्स्नानं संध्यायामुदिते रवौ ।। प्राजापत्येन तत्तुल्यं सर्वपापप्र
णाशनं ।। ब्रह्मांडपुराणे ।। पृथिव्यां यानि तीर्थानि तेषां स्नानेषु यत्फलं ।। विष्णोः पादोदकं मूर्ध्नि दधन्सर्वमवाप्नुयात्
स्कंदपुराणे ।। अयमेव परो धर्मस्त्विदमेव परं तपः ।। इदमेव परं तीर्थं विष्णुपादांबु यः पिबेत् ।। स चैवावभृतस्नातः
स च गंगाजलाप्लुतः ।। विष्णुपादोदकं कृत्वा शंखे यः स्नाति मानवः ।। यतिपादोदकं राजन् हंति पापं पुराकृतं ।। सप्तज
न्मार्जितं सद्यः श्रद्धया शिरसा धृतं ।। बौधायनः ।। संध्यासु स्वमात्मानं प्रज्ञया च संधत्ते ।। यश्चिंतयते वायम
पि वर्द्धयते तस्माद्ध्यानमेव संध्योपासनमिति ।। प्रातर्मध्यंदिने काले स्नानं विधिवदाचरेत् ।। शौचं चमाचमनं चैव
संध्याध्यानमतं द्वितः ।। उद्धायपरपात्रे तु विकृष्य मृत्त्रे विधिनोत्सृजेत् ।। शौचं कृत्वाथ आचम्य तदा स्तोत्रादिकं

या॥ द्वितीयया ललाटे तु हृदये तु तृतीयया॥ प्राणायामत्रयं कृत्वा ऋष्यादिन्यासपूर्वकं॥ प्रणवार्थानुसंधानं पंचीकरणपूर्वकं॥
संध्यां तु विधिवत्कुर्यात्किंचित्कालं समाहितः॥ अष्टोत्तरशतं वापि सहस्रं वा ष्टसंयुतं॥ प्रणवं तु जपेत्पश्चात्प्राणायामत्र
यं चरेत्॥ ततो न्यासं विधायाशु पद्ममष्टदलं लिखेत्॥ संचिंत्य सगणं विष्णुं तत्र पंचोपचारितः संयक्स्तर्पयेत्तत्ता
रेणाष्टोत्तरशतं ततो दक्षिणहस्तस्थतोयं द्वादशवारतः अभिमंत्र्य शिरः प्रोक्ष्य तथान्यदभिमंत्रितं॥ जलं पिबेद्यथा
चम्य दोरं प्रक्षालयेन्नरः॥ कर्णयोरुपरि संस्थाप्य कौपीनं क्षालयेन्नरः॥ अंगवस्त्रं च घटिकां तयोः कृत्वा यथावि
धि॥ वामहस्तस्य पृष्ठे तु संस्थाप्याचमनं चरेत्॥ आर्द्रमुद्रां ललोबध्वा दंडमूले तु तर्पयेत्॥ ततो दंडस्य मूले तु प्रण
वेनैव तर्पयेत्॥ द्विषड्वारं तथाग्रे तु तर्पयित्वा समुद्धितः॥ अन्ये तु त्रिस्त्रिस्तारेण दंडाग्रे त्रिपित्रस्ततः॥ ततउद्धाव
परं दंडस्य मूलाग्राभ्यां स्पृशेज्जलं॥ जलादिक गुरूणां च ज्ञानां वंदनं च यथाक्रमं॥ कृत्वाभिषेकं देवस्य कृत्वा यायान्मे
ठं प्रति॥ देवं संस्थाप्य विधिवत् गुर्वादीनभिवादयेत्॥ शोषणाय गवस्त्रादि प्रसार्य च शुचिस्थले॥ प्रागग्र मुदग

ग्रं वा दंडं नभसि धारयेत्॥ ततः प्रक्षाल्य पादौ द्विराचम्य शुचौ देशे विष्णुपूजा प्रणवजपश्रवणादि कुर्यात्॥ तथा च संप्रदायविदः॥
गुरूपदिष्टमार्गेण न्यासध्यानादिनाचरम्॥ स्वयं पतीता तुलसीपत्राद्यैः स्वाहृतैर्यतिः॥ गंधपुष्पाद्युपचारान् कृत्वा सुस्थि
र आसने॥ जपमालां करे धृत्वा तु प्रणवार्थमनुस्मरन्॥ जपेत् द्वादशसहस्रं प्रणवस्य प्रयत्नतः॥ सहस्रं श्रवणार्थी तु योगाभ्या
सी शतं जपेत्॥ नारदवचनं॥ भिक्षाटनं जपो ध्यानं स्नानं शौचं सुरार्चनं॥ कर्तव्यानि षडेतानि नियतानि नृपदंडवत्॥
सुरार्चनमित्यनेन विष्णोः शिवस्य वार्चनमुच्यते तयोरेव ज्ञानमोक्षप्रदातृत्वात्॥ ध॥ तथा शौनकः॥ आरोग्यं भास्करा
दिच्छेद्धनमिच्छेद्धुताशनात्॥ प्रणम्य दंडवच्चैव मौननमस्कारेणयोर्चयेत्॥ ज्ञानं महेश्वरादिच्छेन्मोक्षमिच्छेज्जनार्दनात्॥ सं
यागं तिमवाप्नोति न सा क्रतुशतैरपि॥ कात्यायनः॥ त्रिकालमेककालं वा पूजयेत्पुरुषोत्तमं॥ व्यासः॥ अन्यैरानीतकुसु
मैरर्चयेज्जगदीश्वरं॥ स्वदानीतैः क्रियः क्रीतैः नार्चयेद्भक्तिमान्यतिः॥ एवं च तुलसीपत्रं पुष्पं पर्युषितं च यत्॥ आनीय

तद्धयत्नेन पूजयेत्पुरुषोत्तमं ॥ भावपुष्पैर्यजेद्योगी बाह्यैर्वा श्रद्धया शिवं ॥ तदर्थं पुष्पहिंसायां न भवेद्धिंसकः क्वचित् ॥ वि
ष्णोः पादोदकं जुष्टं नैवेद्ये स्वच्च भक्षणं ॥ निर्माल्यं शिरसा धार्यं महापातकनाशनं ॥ यदि वाग्यमलोपः स्यात् जपादिषु कथंचन ।
व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययं ॥ कृष्णालयसमीपस्थान् कृष्णदर्शनलालसान् ॥ चांडालान्पतितान्व्रात्या
न् स्पृष्ट्वा न स्नानमाचरेत् ॥ पूजयेद्धरिं चक्रे शालग्रामसमुद्भवे राजसूयसहस्रेण तेनेष्टं प्रतिवासरं ॥ महाकाष्ठस्थितो व
न्हिर्मथितः स्थाने प्रकाशते ॥ यथा तथा हरिर्व्यापी शालिग्रामे प्रकाशते ॥ विना तीर्थैर्विना दानैर्विना यज्ञैर्विना मखैः ॥ मुक्तिं यातीन
रो पश्यन् शालग्रामशिलार्चनं ॥ शालिग्रामसमीपे तु क्रोशमात्रं समंततः ॥ कैकटेपि मृतो याति वैकुंठभुवनं नरः ॥ कपि
लः ॥ प्रातःस्नानेष्वशक्तश्चेत् कापिलं स्नानमाचरेत् ॥ नाभेरधः प्रविश्याप्सु कटिं प्रक्षाल्य मज्जतः ॥ जलार्द्रकर्पटे
नांगशोधनं कापिलं स्मृतं ॥ स्नायं प्रायतरः सामर्थ्ये सायमेवाथवा पुनः ॥ परिचर्यं च कौपीनं मंत्रस्नानं विधीयते ॥ पारा
शरः ॥ चक्षूरोगी शिरोरोगी कंठरोगी कफाधिकः ॥ कंटस्नानं प्रकुर्वीत शिरःस्नानं पूलं लभेत् ॥ कालदोषाद्यसामर्थ्या

न्नाम्ना तु केशवादीनामेकैकं नाम संस्मरेत् ॥ उत्कां द्वादशवारं तु शिरोवदनबाहुषु ॥ हृदयेषु निबिंचेत्तु सस्त्रिंशंखा
ख्यमुद्रया ॥ जलेन तिलकं कृत्वा द्विराचमनपूर्वकं ॥ ततस्तत्तर्पणं कृत्वा गत्वा गुरुसमीपतः ॥ तेषां पादोदकं सिंचेच्छि
रस्यादौ तु पूर्ववत् ॥ ततस्त्रिः पिबेदेवं विष्णोः पादोदकेन च ॥ ततः प्रक्षाल्य कौपीनं निःपीड्य परिधाय च ॥ गुरुप्रक्षाल
मृत्तोयैर्हस्तौ प्रक्षालयेन्मृदा ॥ एकं पादं स्थले कृत्वा द्विराचम्य यथाविधिः ॥ प्राणायामं त्रयं कृत्वा द्विषद्वाराभिमंत्रितैः ॥ जलैः
संप्रोक्ष्य सुघं गं अंगं वस्त्रेण मार्जयेत् ॥ ज्येष्ठानां सन्निधौ विद्वानुपविश्य तु मार्जनं ॥ कंटादूर्ध्वं यतिः कुर्यात् द्वितरत्र यथासु
खं ॥ सुखं त्वष्टगुणेनादौ प्रदक्षिण्येन मार्जयेत् ॥ शिरश्च तु गुणे नैव मानाभेद्विगुणेन तु ॥ एवमेकगुणेनैव पादपर्यंतमार्जयेत् ॥
कौपीनं सहितं दोरमादौ बध्नीत वाग्यतः ॥ कौपीनं चांगवस्त्रं च जलेचो प्लुत्यानिक्षिपेत् ॥ वामवस्त्रं ततः कृत्वा विसृष्टे चांग
वस्त्रके ॥ कौपीने मज्जले क्षिप्त्वा पादौ प्रक्षालयेन्मृदा ॥ तत आचम्य विधिवत्प्राणायामान् षडाचरेत् ॥ अज्ञानकृतहिं
सादि प्रसवा यानि वर्तत्स्येये ॥ अथोर्ध्वपुंड्रं तर्जन्या कुर्यात्स्थानत्रये यतिः ॥ प्रथमं धारयेन्मृद्भिः प्रणवस्याद्यमात्र

न पित्र्येषु च कदाचन ॥ पीत्वा तु हस्तौ प्रक्षाल्य पादौ वोष्ठाव लोमकौ ॥ वारिणांगुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं ॥ तिसृ
भिर्मध्यमाभिर्वा सर्वाभिर्वारिणा स्पृशेत् ॥ अंगुष्ठेन प्रदेशिन्या घ्राणं पश्चादनंतरं ॥ अंगुष्ठानामिकाभ्यां च चक्षुःश्रोत्रे पु
नः पुनः ॥ कनिष्ठांगुष्ठयोर्नाभिं हृदयं तु तलेन वै ॥ सर्वाभिश्च शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत् ॥ आपः स्पृशेत्तु
सर्वत्र मध्ये मध्ये द्विजोत्तमः ॥ आशास्त्रस्त्रि चतुर्वापि पीत्वा प्रक्षालयेत्करं ॥ मुखं प्रमृज्य विधिवन्नाभिंचैव तु सं
स्पृशेत् ॥ यतिश्च ब्रह्मचारी च नाचमेच्चर्मवारिणा ॥ वानप्रस्थो गृहस्थश्च दैवे पित्रे च कर्मणि ॥ याज्ञवल्क्यः ॥ अंत
र्जानु शुचौ देशे उप[illegible]विष्ट उदङ्मुखः ॥ प्राक् ब्राह्मेण तु तीर्थेन द्विजो नित्यमुपस्पृशेत् ॥ शुचौ अशुचिद्रव्या
संस्पृष्टादेशे इत्यकपानहच्छत्रशयानासनादिनिषेधः ॥ उपविष्टो न स्थितः ॥ शयानः प्रह्वो गच्छन् ॥ वा उद
ङ्मुखो वेति ॥ दिगंतरनिवृत्तिः ॥ शुचिदेशादित्येतस्मात्पादप्रक्षालनप्राप्तिः ॥ ब्राह्मेण तीर्थेन वक्ष्यमाण द्विजो
न शूद्रादिः ॥ नित्यं सर्वकालमाश्रमांतरतोपि ॥ उपस्पृशेदाचमेत् ॥ कथमंतर्जानुनाभिध्ये हस्तौ कृत्वा

दक्षिणेन हस्तेनेति ॥ कनिष्ठिकादेशिन्यंगुष्ठमूलान्यग्रं करस्य च ॥ प्रजापति पितृ ब्रह्म देवतीर्थान्यनुक्रमात् ॥
तीर्थानि यथा ॥ कनिष्ठिकायास्तर्जन्याश्च अंगुष्ठस्य मूलानि करस्याग्रं प्रजापति पितृ देवतीर्थानि यथा वेदितव्यानि ॥
त्रिः प्राश्यापो द्विरुन्मृज्य नखान्यद्भिः समुपस्पृशेत् ॥ अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः ॥ वारयेत्रमपः
पीत्वा मुखमंगुष्ठमूलेन द्विरुन्मृज्य नखानि छिद्राणि ऊर्ध्वकायगतानि घ्राणादीनि अद्भिरुपस्पृशेत् ॥ अद्भिर्द
व्यांतराः संस्पृष्टाभिः पुनरद्भिरिति ग्रहणं प्रतिछिद्रकस्पर्शनार्थं पुनस्तान्येव विशिनष्टि ॥ प्रकृतिस्थाभिः गंध
रूपरसस्पर्शांतरमप्राप्ताभिः फेनबुद्बुदरहिताभिः तु शब्दात् वर्षधारागतानां शूद्राद्यावर्जितानां च निषेधः ॥ हृत्कं
ठतालुकाभिस्तु यथासंख्यं द्विजातयः ॥ शुद्धेरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः ॥ यमः ॥ अपः करनखं
स्पृष्ट्वा यथाचामेत्ति वै द्विजाः ॥ सुरां पिबति चैवैतं यमस्य वचनं यथा ॥ उद्धृत्य वामहस्तेन यः पिबेत् ब्राह्मणो जलं

सुरापानेन तत्तुल्यं मनुः स्वायंभुवोऽब्रवीत्॥ करकालांबुकाष्ठेन ताम्रपर्णेन नौरिपुटेन च॥ स्वहस्ताचमनं कार्यं स्नेह
लेपांश्च वर्जयेत्॥ आलांबुदारुपर्णेन नारिकेलैः क्वापि छुक्कैः॥ तृणकाष्ठजलाधारैरन्यांतारितमन्मयैः॥ वामेनोद्धृत्या
चाचमेदन्यदातुरसंभवे॥ भविष्यपुराणे॥ सोपानस्थो जलस्थो वा मुक्तकेशोऽपि वा द्विजाः॥ उष्णीषी नापि नाचामेत् वस्त्रे
णाच्छाद्य वा शिरः॥ न गच्छन्न शयानश्च न चलं न पराम्रशेत्॥ न हसन्नैव संजल्पन्नात्मानं नैव वीक्षयेत्॥ केशान्नि
वमधः कायं स्पृशेन्न धरणीमपि॥ यदि स्पृशति चैतानि भूयः प्रक्षालयेत्करं॥ गोभिलः॥ जानुभ्यामूर्ध्वमाचम्य ज
ले तिष्ठन्न दुष्यति॥०॥ पैठीनसिः॥ अंतरुदकमाचांतोऽतरेव शुद्धो भवति॥ बहिरुदक आचांतो बहिरेव शुद्धः स्या
त्स्यादंतरेकपादं कृत्वा बहिरेकपादं कृत्वाचमेत् सर्वत्र शुद्धो भवति॥ बौधायनः॥ पादप्रक्षालनशिष्टेन नाचमेद्यद्या
चमेत्॥ भूमौ श्रावयित्वाचामेति॥ भूमौ श्रावणं वर्जोदकमात्रोपलक्षणं॥ यमः॥ तावन्न पः स्पृशेद्विप्रो यावदामे
नसंस्पृशेत्॥ वामे हि द्वादशादित्या वरुणस्त्रिदशेश्वरः॥ शौचशेषं पादशेषं पीतशेषं तथैव च॥ मद्यतुल्यं तु

न्नशक्नोति यथाप्यसौ॥ ऋषिभिस्तु तदाज्ञाता मंत्रैर्दिष्टं तु मार्जनं॥ आग्नेयं भस्मना स्नानं आवगाह्यं च वारुणं॥ आपोहिष्ठे
ति ब्राह्म्यं च वायव्यं जरसा गवां॥ यत्तु सातपवर्षाद्भिस्तत्स्नानं दिव्यमुच्यते॥ स्नानान्येतानि चापत्सु व्याधितस्योदकं विना॥
स्नानेष्वप्यशक्तः स्नायीत निस्यमुष्णेन वारिणा॥ तैलाभ्यंगो न दुष्येत व्रणीनां वातरोगिणां॥ अत्रिः॥ स्नानं त्रिषवणं प्रोक्तं
नियमास्तु त्रिदंडिनां॥ नैतत्सर्वं हंसानां मुक्तानामात्मदर्शिनां॥ मेधातिथिः॥ स्नानं त्रिषवणं प्रोक्तं बहूदकवनस्थयोः॥
हंसे तु सकृदेव स्यात् परमहंसे न विद्यते॥ अथाचमनविधिः॥ तत्र दक्षः॥ प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदंबु वीक्षितं॥ स
म्मृज्यांगुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं॥ संहतांगुलिभिः पूर्वमास्यमेव मुपस्पृशेत्॥ अंगुष्ठेन प्रदेशिन्या घ्राणं पश्चा
दनंतरं॥ अंगुष्ठानामिकाभ्यां च चक्षुःश्रोत्रे पुनः पुनः॥ कनिष्ठिकांगुष्ठयोर्नाभिं हृदयं च तलेन वै॥ सर्वाभिश्च शिरः प
श्चाद्बाहू चाग्रेण संस्पृशेत्॥ शंखः॥ प्रक्षाल्य पादौ हस्तौ च संस्थाप्य चरणौ भुवि॥ सन्निबद्धं च कृत्वा शिखाः स्मृत्वा चैव
षट् देवतां॥ दक्षिणं तु करं कृत्वा गोकर्णाकृतिवत् पुनः॥ माषमज्जनमात्रस्तु संगृह्य त्रिः पिबेदपः॥ बहुतीर्थेन दैवे

नांच संभाषेद्दक्षिणं श्रवणं स्पृशेत्॥ मार्कंडेयपुराणे॥ कुर्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनं॥ कुर्वीतालंभनं वापि द
क्षिणं श्रवणस्य च॥ यथा विभवतो ह्येतत्पूर्वाभावे ततः परमिति॥ आचमनापवादः॥ याज्ञवल्क्यः॥ मुखजा विप्रुषो
मेध्यास्तथाचमनबिंदवः॥ श्मश्रु चास्यगतं दंतसक्तं त्यक्त्वा ततः शुचिः॥ मनुः॥ दंतवद्दंतलग्नेषु जिह्वास्पर्शेऽशुचि
र्नतु॥ परिच्युतेषु च स्थानान्निगिरन्नेव तच्छुचिः॥ शातातपः॥ दंतलग्ने फले मूले अप्सु प्राणाहुतौ तु च॥ स्नेहे
सोमे चेक्षुदंडे नैवोच्छिष्टो भवेद्द्विजः॥ स्पृशंति बिंदवः पादौ य आचामयतः परान्॥ न तैरुच्छिष्टभावः स्यात्तुल्या
स्ते भूमिगैः सह॥ ॥अथ प्राणायामः॥ शौनकपरिशिष्टे॥ अथ प्राणायामं व्याख्यास्यामः॥ यावत्पूरकमात्रा
द्विगुणा रेचके पुनः कुंभके चातुर्गुण्या च प्राणायामो य उच्यते अष्टमात्रः पूरकः षोडशमात्रो रेचको द्वात्रिंशन्मात्रा
कुंभक इति॥ शिशुप्राणायामः॥ द्वादशमात्रः पूरकः चतुर्विंशतिमात्राभिः रेचकः॥ अष्टचत्वारिंशन्मात्रा कुंभ
क इति॥ मध्यमः॥ षोडशमात्रा पूरकः॥ द्वात्रिंशन्मात्रा रेचकः॥ चतुःषष्टिमात्रा कुंभक इति॥ याति प्राणायामः॥

अक्षरकालो मात्रा प्रायश्चित्तं चैतत्सर्वेषु दुष्कृतेषु॥ रेचकं दक्षिणे नासे पूरकं वामनासिके॥ अंगुष्ठांगुलिभिश्चै
व प्राणायामं समाचरेत्॥ प्राणायामैकनिष्ठस्य न किंचिदपि दुर्लभं॥ मार्कंडेयपुराणे॥ लघु द्वादशमात्रैस्तु द्विगुणः स तु
मध्यमः॥ त्रिगुणाभिश्च मात्राभिरुत्तमोऽय उदाहृतः॥ शक्त्यापेक्ष्याल्पधादिस्वव स्थाचैव स्वतः॥ द्वादशावर्त्तनं यत्तु प्रण
वस्य मनो हृदि॥ प्राणायामो यलैः प्रोक्तः प्राणायामोन्म्ये चोमिति॥ कूर्मपुराणे॥ प्राणस्त्वदेहजो वायुः आयामस्तन्निरोधनं॥
मात्रा द्वादशको मंदश्चतुर्विंशतिमात्रकः॥ मध्यमः प्राणसंरोधः षट्त्रिंशन्मात्रकोत्तमः॥ सगर्भमाहुः सजपमगर्भं
विजपं बुधाः॥ रेचकः पूरकश्चैव प्राणायामोऽथ कुंभकः॥ रेचको जस्त्रनिश्वासः पूरकः संनिरोधकः॥ साम्येन संस्थि
तिर्यस्सं कुंभकः परिगीयते॥ वसिष्ठः॥ प्रणवेनैव कुर्याच्च प्राणायामान्यतिर्मुहुः॥ सर्वेषामपि पापानां संघाते समु
पस्थिते॥ पूरकः पूरणं वायोः कुंभकः स्थापनं हृदि बहिर्निःसरणं तस्य रेचकः परिकीर्तितः॥ अभ्यसेद्दशसाहस्रं प्रणव
शोधनं हितत्॥ रेचकं वाममार्गेण पूरकं दक्षिणे तथा॥ कुंभकं तु तयोर्हीनं मध्यमं हृदि तिष्ठति॥ निरोधाज्जाय

तेवायुर्वायोरग्निर्हि जायते॥ताभ्यामापोभिजायंते तत्तोंतः शुद्ध्यते त्रिभिः॥चतुर्विंशतिमावर्त्तिं षट्त्रिंशद्द्वादशा
थवा॥प्रणवस्य स्मरेत्तस्य प्राणायामो यतानिलः॥भिन्नलक्षणप्राणायामानिधानं यथाधिकारं द्रष्टव्यं॥प
रमहंसस्य तु प्राणायामः प्रणवयुक्त एवस्यान्नान्यः॥प्रणवाभ्यासविक्षेपमानंदात्मस्थितिप्रियं॥यतिपर
महंसाख्यं यत्नेनार्चितुमर्हति॥तस्य दोषः स्यादिति शेषः॥वेदो वृक्षस्तस्य मूलं प्रणवो यस्य सोस्ति सः॥
वृक्षमूलीयतिः स्यात्त्यक्त्वा वेदपरिग्रहं॥इति स्मृतेः॥न चतो ऊर्ध्वममंत्रवदाचारेदित्यादिश्रुतिवच
नविरुद्धमेतत्स्मृतिवचनं न विरुद्धं॥सर्वेषु वेदेष्वारण्यकमावर्त्तयेदित्यादिवेदवचनं न परमहंसस्यापि आ
रण्यावृत्तेर्विहितत्वाच्च॥मनुः॥आत्मज्ञाने शमे चास्याद्वेदाभ्यासे च यत्नवान्॥वेदाभ्यासः प्रणवा
भ्यासः अत ऊर्ध्वममंत्रवदाचरेदिति श्रुतिवचनं तु प्रणवव्यतिरिक्तप्रतिषेधार्थमित्यविरोधः॥दह्यं
ते ध्मायमानानां धातूनां हि यथा मलाः॥तथेंद्रियाणां दह्यंते दोषाः प्राणस्य निग्रहात्॥प्राणायामैर्दहे
दोषान्धारणाभिश्च किल्बिषं॥प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान्॥ ॥

त्तोयं पर्युक्षकरणं विना॥आचमननिमित्तानि॥मनुः॥सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतं वचः॥पीत्वापो
ध्येष्यमाणश्च आचमेत्प्रयतोपि सन्॥ब्रह्मपुराणे॥अधोवर्णस्य संलापे सुप्ते वादे तथाचने॥आचम्य प्रयतो
भूत्वा ततः शुद्धो भवेन्नरः॥अधवर्णश्चांडालादिः॥यमः॥उत्तीर्योदकमाचामेदवतीर्य तथैव च॥हारीतः॥स्त्री
शूद्रोच्छिष्टाभिभाषणे आचमेत्॥मूत्रपुरीषोत्सर्गदर्शने देवताभिगंतकाम आचमेत्॥अथ द्विराचम्यनिमित्तानि॥
याज्ञवल्क्यः॥स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे॥आचांतः पुनराचामेद्वासो विपरिधाय च॥यमः॥स
कर्दमे तु वर्षासु प्रविश्य ग्रामसंकरं॥जंघयोर्मृत्तिकास्त्रिस्त्रः पद्भ्यां च द्विगुणं स्मृतं॥एवंविधरथ्याप्रसर्पणे एवंवि
धप्रक्षालनांतरमाचमनं॥उदकाभावे आचमनानुकल्पः॥बृहस्पतिः॥पितृमंत्रोच्चारे रौद्रे आत्मालंभे धमे क्ष
णे॥अधोवायुसमुत्सर्गे आक्रंदे क्रोधसंभवे॥मार्जारमूषकस्पर्शे प्रहासेनृतभाषणे॥निमित्तेष्वेषु सर्वेषु दक्षि
णं श्रवणं स्पृशेत्॥आर्द्रं तृणं गोमयं वा भूमिं वा संस्पृशेद्द्विजः॥क्षुते निष्ठीवने चैव दंतोच्छिष्टे तथानृते॥पतीता

मा।। कनिष्ठः पंचविंशत्यापरिमाणं विधीयते।।बौधायनः।। वृक्षमूलिको वेदः संन्यासीवेदोवृक्षःप्रणव स्त
स्य मूलं प्रणवात्मकोवेदः प्रणवंध्यायन्प्रणवोब्रह्मभूयायकल्पत इतिहोवाच प्रजापतिरिति।।वैवस्वतः।।
पादमाक्रम्यपादेनजपंनैवतुकारयेत्।।शिरःप्रावृत्य वस्त्रेणध्यानंनैवप्रशस्यते।।व्याहरेदक्षरश्रेण्यां व
र्णाद्वर्णं पदात्पदं।।शब्दार्थचिंतनाभ्यासात्सउक्तोमानसोजपः।।पद्मे।।परमहंसव्रतीनस्तुप्रणवाभ्यासशालि
नः।।यद्यनुत्पन्नविज्ञानोविरक्तःसंयतेंद्रियः।। यावज्जीवंजपेन्मंत्रंप्रणवंब्रह्मणोवपुः।।दृष्टोदहतिपापा
नि दीर्घो मोक्षप्रदायकः।।पुलस्त्यः सर्वसिद्धोस्या प्रणवस्त्रिविधंस्मृतः।।अकारऋग्वेदउयजुर्वेदःमकारःसा
मसंज्ञकः।।काठके।।सर्वेवेदायत्पदमामनंति।।तत्तेपदंसंग्रहेणब्रवीम्योमित्येतत्।।तपांसिसर्वाणिचयद्व
दंति।।यदिच्छंतोब्रह्मचर्यंचरंति।।एतदालंबनंश्रेष्ठमेतदालंबनंपरं।।एतदालंबनंज्ञात्वाब्रह्मलोके
महीयते।।यस्तुद्वादशसाहस्रंनित्यंप्रणवमभ्यसेत्।। तस्य द्वादशभिर्मासैः परं ब्रह्म प्रकाशते।।अथश्र

वणविधिः।।तत्रेयमितिकर्तव्यता।।कूर्मपुराणे।।आचम्यसंयतोनित्यमधीयीतउदङ्मुखः।।उपसंगृह्यतत्पादौ
वीक्ष्यमाणोगुरो

दोषान् धारणाभिश्च किल्बिषं ॥ प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ॥ ० ॥ अथ जपविधिः ॥ ?॥
योगयाज्ञवल्क्यः ॥ उपांशुजपयोगस्तु तस्माच्छतगुणो भवेत् ॥ सहस्रो मानसः प्रोक्तो यस्माध्यानसमो हि सः ॥
तस्माद्वाचिकात् ॥ न चंक्रमन्न हसन्न पार्श्वमवलोकयन् ॥ नापाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा ॥ कौ
र्येत जपकाले न भाषेत नान्यानि प्रेक्षयेद्बुधः ॥ न कंपयेच्छिरोग्रीवां दंतान्नैव प्रकाशयेत् ॥ व्यासः ॥ अंगुल्य
ग्रेषु यज्जप्तं यज्जप्तं मेरुलंघने ॥ असंख्यातं च यज्जप्तं तज्जप्तं निष्फलं भवेत् ॥ अनामिकायां मध्ये च मध्या
च्चाधः क्रमेण तु ॥ तर्जन्या विजयांते च अक्षमाला करे स्थितः ॥ मध्यमादि द्वयं वर्ज्यं जपकाले विपश्चिता ॥ त
न्मेरुं विजानीयाद्बुधिस्तं ब्रह्मणः स्वयं ॥ शिवपुराणे ॥ अंगुल्या जपसंख्यानं मेकमेकमुदाहृतं ॥ रेख्याष्टगुणं
विद्यात्पुत्रजीवैर्दशाधिकं ॥ शतं स्याच्छंखमणिभिः प्रवालैस्तु सहस्रकं ॥ स्फटिकैर्दशसहस्रं मौक्तिकैर्ल
क्षरुद्राक्षैरनंतं गुणितं भवेत् ॥ वराहे ॥ अक्षमालायाः परिमाणमुक्तं ॥ उत्तमा तु शतं प्रोक्तं पंचाशद्भिश्च मध्य

भांडं च मृष काष्ठं विधर्भिवा॥ अपविद्धमसन्मार्गं छिद्रिकां छिन्नितं तथा॥ वसनं नीलिकारक्तं धर्मसेतारमेव च॥ अमेध्यानि च यं स्वडुं स्पृष्ट्वा
देवलकं म[illegible]ति:॥ स्वाध्यपात्रं मुचोदे शोभुभंगछेज्जलाद्रायं॥ शौचं कृत्वा यथान्याय्यं क्षालयेत्तु मृदंभसा॥ यदेवापहतं योगं
मृद्भिर्द्वादशाभिर्यतिः॥ निमज्जेत्तु ततस्तोये कुर्यादाचमनं ततः॥ प्राणायामत्रयं कृत्वा त्रिजपेदघमर्षणं॥ अंतर्जले यथान्या
मंश्रुध्यर्थं योगदीक्षितः॥ भैक्षाभारं समाधाय त्रिकेणाप्युक्ष्यवारिणा॥ निमज्ज च ततस्तोये शुध्यर्थं संकरेत्तदा॥ एव
मेषा हिंसं स्पृष्टा भिक्षा भिक्षुर्विशुध्यति॥ यदापात्रं नसंलग्नं तदा शुध्यति नान्यथा॥ संलग्ने त्वथ पात्रे तु स घस्सागोवि
धीयते॥ उद्धृत्य सव्यहस्तेन तोयं पिबति वै द्विजः॥ सुरापानेन तत्तुल्यं पीत्वा चान्द्रायणं चरेत्॥ तांबूलाभ्यांजनं चै
व कांस्यपात्रे च भोजनं॥ कृत्वा चोपवसेद्भिक्षुः स्रग्गंधादिविभूषणं॥ जाबालिः॥ सन्यासं कुरुते यस्तु श्राद्धं तस्य
विधीयते॥ तस्यान्नं नैव भोक्तव्यं भुक्त्वा चांद्रायणं चरेत्॥ भर्तृहीना तु या नारी स्वतंत्रा बंधुवर्जिता॥ तदन्नं नै
व भोक्तव्यं भुक्त्वा चांद्रायणं चरेत्॥ स्वधर्मास्त्रस्तु ना ये वै पुरुषा घोषिता पिवा॥ अविरात्ते स दा ज्ञेया निसंस
द्भिर्विगर्हिताः॥ जमदग्निः॥ आहारग्रहणे रात्रौ प्राणायामद्वयं स्मृतं॥ जलग्रहणे रात्रौ प्राणायाम
मेव च॥ भुक्त्वा शेषं न कुर्वीत प्रमादात्कुरुते यदि॥ प्रतिग्रासं तदा कुर्यात्त्रीन्त्रीन्प्राणायामा

यतिः॥ विशीर्णे च सलिले पंचपात्रं सोपहतं यदा॥ तत्र मोहाद्यतिर्भुंक्ते चरेदिंदुव्रतं सकृत्तं सकृत्॥ देवलः॥ हंसभणघ्नं पारवंडेः कुक्ष्या
दिभिरुक्षया॥ श्वपंककाकचांडालैः रसैरसवसादिभिः॥ एतैः स्पृष्टं न भुंजीत भुक्त्वा चांद्रायणं चरेत्॥ पतितान्नं सकृद्
क्त्वा प्रायश्चित्ती भवेद्यतिः॥ तप्तकृच्छ्रत्रयं कृत्वा शुध्यंते नात्र संशयः॥ यमः॥ कुपाने हो विना भिक्षुः कृत्वा भिक्षाटना
दिकं॥ मार्गे मूत्रादि संकीर्णे सम्यक् स्नानेन शुध्यति॥ अज्ञानाद्यो भवेद्दीर्घं सायं ते भिक्षाटने क्वचित्॥ प्राणायामत्र
यं कृत्वा तथाचम्य विशुध्यति॥ जाबालिः॥ स्वस्थावस्थो यदा भुंक्ते पुनराहस्तन्न दिने॥ अभ्य आमेथवान स्मिन् तस
कृच्छ्रं समाचरेत्॥ यस्त्वग्रामहूयोभिक्षुश्चरेद्भैक्षं प्रमादतः॥ स्वधर्मात् कुत्र[illegible]ध्वस्त तदा चांद्रायणं चरेत्॥ अ
त्रिः॥ प्राणरक्षार्थं पुनर्मूलफलादिकं॥ भक्षयेन्नेव दुष्येत्तभेषजं दंतधावनं॥ यथा न पीड्यते कायो नैवांतु कव
र्णं व्रजेत्॥ तथा धर्मं चरेद्भिक्षुः पश्यन्वै शास्त्रचक्षुषा॥ एकान्नं मधुमांसं च अन्नं विष्टादिदूषितं॥ हंतका
रं निवेद्यं च प्रसक्षलवणं तथा॥ एतान् भुक्त्वा यतिर्मोहात् आजापत्यं समाचरेत्॥ यस्मिन्नं यति पात्रस्थं यति
ना त्ररित्तं च यत्॥ अन्नत्रयं न भोक्तव्यं भुक्त्वा चांद्रायणं चरेत्॥ अत्रिः॥ सक्तुपेषणगोहात्त अन्नपानादिको

लन॥ ऊर्ध्वं यदि प्रतिस्तंतिभिक्षार्थं भैक्षमाचरेत्॥ कालातिक्रमदोषेण स्वधर्मात्संच्युतो भवेत्॥ दूरस्थो वा तथा कुर्यात्प्रा
णायामांश्च षोडश ये॥ ज्ञातीनां तु कुले भिक्षुर्न भिक्षेत कदाचन॥ आचरेत्तु यदा भिक्षां तदा चांद्रायणं चरेत्॥ प्राणाया
मशतं कुर्याद्भुक्त्वा शूद्रान्नमापदि॥ सगोत्रमासगोत्रं वा भक्त्वा हंसस्तु तत्कं भवेत्॥ नता वध्यते भूमिर्यावन्नस्या
दनिर्दशा॥ भिक्षां भिक्षुर्न भिक्षेत भिक्षेच्चांद्रायणं चरेत्॥ निषिद्धान्नं यदाश्नीयादनुज्ञा यत्र नास्ति हि॥ अति
कृच्छ्रं तदा भिक्षुः कुर्याच्छुद्ध्यर्थमात्मनः॥ जमदग्निः॥ गंधं घ्रात्वा सुरायाश्च तथा पुरीषयोः॥ क्रव्यादमूत्रगंधं
च प्राणायामो विधीयते॥ उच्छिष्टे वामहस्तेन भाजनं योन्नमात्रि वे॥ घ्रातोच्छिष्टं तु तत्रैवं भुक्त्वा चांद्रायणं चरे
त्॥ भुंजानस्य यदा भिक्षोः कदाचित्प्रवते गुदं॥ अन्नं [illegible] चास्य गतं सक्त्वा कृत्वा शौचं समाहितः॥ स्नानं कृत्वा यथा
न्यायं त्रिशतं प्राणायामांश्चरेत्॥ अहोरात्रोषितो भूत्वा पंचगव्यं पिबेत्ततः॥ आश्वलायनः॥ विनांगुष्ठेन नाश्नी
यान्नलेहेदंगुल्या करं॥ अश्नन्यदि लिहेद्धस्तं तदा चांद्रायणं चरेत्॥ विश्वामित्रः॥ मत्स्यमांसादि बहुलं य
द्गृहे [illegible]॥ न गृहं वर्जयेद्भिक्षुर्यदि भिक्षां समाचरेत्॥ द्वादशान्संयमान्कृत्वा याति पापात्प्रमुच्यते॥

अथ प्रायश्चित्तं॥ प्रयोगसारे॥ तिष्ठेन्नन्विरमादिसमुपस्थाय च भिक्षया॥ स्थित्वा द्वादशसंख्याप्राणायामांस्ततैव तु॥ वाचं विसृज्य चाभा
वि ष्यत्निरेव तु निःक्रियः॥ उदक्या चोदितं चान्नं द्विजान्नं शूद्रचोदितं॥ प्रत्यंगेवायसेवान्नं पिअर्थकल्पितं तथा॥ देवादिकर्मणि क्लप्तं तथा पापे कृ
दाहृतं॥ नो सन्न्यासं ततिः क्वाचित्स्त्रियः पुंसोपि वा गृहे॥ नाश्नीयात्तद्गृहे भिक्षुरश्नंश्चांद्रायणं चरेत्॥ अशौचं वा गृहे यत्र यावत्सूतकमेव
वा॥ पाखंडिकुष्ठिभ्रूणघ्नैर्दृष्टं चान्नं मुरक्षया॥ श्वषंढकाककांडालैरन्यैरसावसादिभिः॥ चांद्रायणं चरेद्भुक्त्वा भक्षितात्तु यदृच्छया॥
पात्रे तु पतिते भैक्षे यः कोभिक्षां करोति यः॥ कुर्यात्सांतपनः प्रांतः प्राणायामान्विशुद्धये॥ जमदग्निः॥ अथ वा यत्कृतं ब्रूयात्का
र्यमावित्रं कया॥ निग्रहे नुग्रहे वापि गुरुः सर्वत्र कारणं॥ विहाय दंडं गच्छन्नो द्वादशो वसुधारयेत्॥ बहिर्दंडं प्रतिष्ठाप्य गृह्णानः
कोडशैव तु॥ भैक्षमिति दोषः॥ अत्रिः॥ भैक्षं च परपाकान्नं संमिश्रं योन्निवेयतिः॥ त्रिरात्रोपोषितो भूत्वा प्राणायामान्शतं
चरेत्॥ श्वपाकगर्धभैरुष्ट्रैर्जंबुकैर्वानरैस्तथा॥ चांडालपतितैः स्पृष्टं यतिः पात्रं विसर्जयेत्॥ यत्तु शोणितमांसैस्तु स्पृष्टं
मूत्रपुरीषयोः॥ श्लेष्माश्रुनेन संस्पृष्टं यतिः पात्रं विसर्जयेत्॥ यमः॥ यदि पर्युषितं भैक्षमश्नाति क्षितः कथंचन॥ तदा चांद्रायणं
कुर्याद्यतिः शुद्ध्यर्थमात्मनः॥ भिक्षुर्द्विभोजनं कुर्यात्कदाचिदज्ञानदुर्बलः॥ स्वस्थावस्थो यदा मोहात्तदा चांद्रायणं
चरेत्॥ आखुजंबुकमार्जारखरकाकोष्ट्रशूकरान्॥ भासवानरवेत्रमश्वनरास्थियामकुक्कुटान्॥ नकुलं मद्य

नमुच्यते॥ बहुत्वपरिग्रहे॥ सुवर्णरजतंताम्रंतैजसंयात्स्वकिंचन॥ स्पृष्ट्वापरिग्रहंभूइंचसवासाजलमाविशेत्॥ द्रव्यंसमुत्सृतंस्पृष्ट्वात्रिरात्रेणशु
ध्दिर्भवेत्॥ अत्रिः॥ श्वाव्युष्ट्रजंबुकेदृष्टेनररासभे॥ क्रव्यादर्दष्टिभिश्चान्यैः प्रायश्चित्तंयतिश्चरेत्॥ स्नात्वास्पृष्ट्वाहरिंकुर्यात्द्वादशप्रासंयमा
न्॥ स्वकायेचस्वमुसाद्यशोणितंवेयतिक्वचित्॥ प्राणायामत्रयंकृत्वातथाचम्यविशुध्यति॥ अत्रिः॥ आरूढपतितंदृष्ट्वाविनास्नानंतुयश्चरेत्॥
पानभिक्षादिकंकर्मतदाचांद्रायणंचरेत्॥ कपिलः॥ स्वप्नस्त्रीसहसंभोगेस्नात्वात्रिसहस्रंजपेत्॥ कंडूयनेनक्षरणेउपवासस्ततश्चरेत्॥ श
तंत्रयंवाजपेद्यतिः॥ देवलः॥ स्वप्नस्कन्नेदुर्बलत्वात्प्राणायामास्तुषोडश॥ रेतःसेकंक्वचिद्भिक्षुःकुर्यान्मोहात्तुकामतः॥ प्राजापत्यत्रयं
कृत्वाप्राणायामंशतंचरेत्॥ स्वभावतोदिवास्कन्नेप्राजापत्यंसमाचरेत्॥ स्त्रियंदृष्ट्वायदास्वप्नेरेतःक्षरतिवैक्वचित्॥ सवासाप्सुसंशु
ध्यर्थंकुर्यात्षोडशसंयमान्॥ उपवासंयतिःकुर्यात्सुनःसुप्तःक्षरेद्यदि॥ प्राणायामेविशुध्यात्माविरजोजायतेपुनः॥ शुणात्तुकृमिसं
भूतेभक्षणेमधुमांसयोः॥ उपवासत्रयंकृत्वाप्राणायामशतंचरेत्॥ यूकायाशानसंभूतेउपवासंसमाचरेत्॥ तांबूलभक्षणेप्यं
गेकांस्यपात्रेचभोजने॥ एकैकातिक्रमेतत्रप्राणायामाशतंचरेत्॥ अहंडोनयहंगच्छेद्भिक्षुःपत्रिकाद्वये॥ यदिगच्छेत्प्रतिगृहं
प्राणायामत्रयंचरेत्॥ हारीतः॥ गुरुवचनातिक्रमेचस्वधर्मातिक्रमेचपर्यचांद्रायणंचरेत्॥ वर्षाकालेविनाविघ्नंशरणंसंस
जेद्यतिः॥ शुध्यर्थंतुततःकुर्यात्कृच्छ्रंचशतसंयमान्॥ पतितकोत्रंचरेत्कृच्छ्रंलोभमोहादिनासजेत्॥ सत्यकामः॥ दंडग्रहणंकृ

पुत्रमित्रादिसंभाषणंनकुर्यात्॥ अज्ञानात्तुसंभाषणंकृत्वाप्रायश्चित्तेनयुज्यते॥ उपवासंएकंकृत्वाप्राणायामशतंकुर्यात्॥ नद्रष्टुंगच्छति
स्वजनेकरोति॥ भिक्षागृहात्प्राजापत्यव्रतंकृत्वाप्राणायामशतंचरेत्॥ तंदृष्ट्वादुःखंकरोतिअश्रुन्यात्तयन्प्रायश्चित्तेनयुज्यते॥ उपवास
त्रयंकृत्वाप्राणायामेशतंचरेत्॥ अत्रिः॥ यदिकश्चित्प्रमादेनविनास्नानंसमाचरेत्॥ स्नानपानादिकंकर्मप्राजापत्यंसमाचरेत्॥ सत्यकामः॥
संध्यादिक्रमयोभिक्षुःप्रायश्चित्तंसमाचरेत्॥ जपेत्त्रिकंसहस्रंचप्राणायामांश्चषोडश॥ कपिलः॥ पूर्वंसंभोगंचनस्मरेत्॥ प्रमादा
त्स्मरणात्सर्वम्यप्राणायामत्रयंकृत्वापुनराचमेत्॥ स्वप्नसंभोगेस्नात्वात्रिकसहस्रंजपेत्॥ अत्रिः॥ नीलधान्यसुवर्णानिगोभूम्या
न्गृहादिकं॥ कासीदासंग्रहणंध्यात्वित्वायावित्तंतुयत्॥ दृष्ट्वाकंपुराकृत्वानतत्सर्वंचपरित्यजेत्॥ संसज्यसर्वद्रव्यंचततश्चरेच्चांद्रायणं
यतिः॥ ग्रहणंतुयदाकुर्याद्यतिस्तिलकुशादिकं॥ प्रक्षिप्यतत्धनंभ्रमोचरेत्कृच्छ्रंजपेत्त्रिकं॥ वायुपुराणे॥ संन्यासीयोहिभूत्वातुहि
रण्यंसंग्रहेद्यदि॥ तस्यदर्शनमात्रेणसचैलोजलमाविशेत्॥ द्रव्यदानंयतीनांयोकरोतिचनराधमः॥ पच्यतेनरकेघोरेयाव
दाभूतसंप्लवं॥ अहंतेनभावमाश्रित्यदेहेताचारेणवर्जते॥ कुर्वंतिपितृहस्तस्यहाकष्टपतितंपुनः॥ लब्धद्रव्यात्मरिसज्यउ
पवासत्रयंचरेत्॥ प्राणायामशतंकृत्वाश्रुतंजपमाचरेत्॥ स्वर्णार्थेशिबिकामभ्यंगजंवृषभमेवच॥ शकटंवारथंवापि
समारुह्यचकामतः॥ नतत्संतर्पणंकुर्यात्प्राणायामशतान्वितं॥ असामर्थ्येसमारुह्यश्मानंपूर्वविधितंमन॥ कृच्छ्रं

शोधनं तत्र प्राणायामांस्तु कामतः॥ स्वयं पक्वान्तु यो भुंक्ते तस्य सांतपनत्रयं॥ पाचयित्वा तु यो भुंक्ते तस्य कृच्छ्रं विधीयते॥ गंडूषपादशौचा
दि यस्मिन् पात्रे च संक्षिपेत्॥ षण्मासं निक्षिपेद्भूमौ दशक्षारेण शुध्यति॥ मार्कंडेयः॥ मूत्रोत्सर्गं तु य[redacted]कृत्वा शौचमात्मनः मोहा कृत्वा अ
द्कृच्छ्रत्रिरात्रं सम्यग्व्यं पीत्वा विशुध्यति॥ गव्यघृतं॥ मूत्रं कृत्वा व्रजेन्मार्गं स्मृतिभ्रंशाज्जलं पिबेत्॥ उपोष्य रजनीमेकां पंचगव्ये
न शुध्यति॥ छागलेयः॥ व्रतानि यानि भिक्षूणां तथैवोपव्रतानि च॥ एकैकातिक्रमे तेषां प्रायश्चित्तं विधीयते॥ अहोरा
त्रोषितो भूत्वा कृच्छ्रं चांद्रायणं चरेत्॥ धर्माज्ज्ञानात्तपोध्यानान्नान्यद्धिसौतिशोधनं॥ तस्मात्तानि सदा कुर्याद्यतिः कुर्या
द्यतिः शुद्ध्यर्थमात्मनः॥ उपपातकिनो भिक्षोरूर्ध्वाहारो जपस्ततः॥ मौनकालत्रये स्नानं विहितानि विशेषतः॥ सहस्राणि
यमान् कुर्यात्प्रणवस्यायुतं जपेत्॥ अरण्ये व्रतमेतत्तु कृत्वा भिक्षुर्विशुध्यति॥ महापातकादोषान्शुध्यर्थं तु सदा यतिः॥
त्रिलक्षं तु जपेद्योगी प्राणायामो युतं तथा॥ ततः शतसहस्रं तु प्रणवानां जपेद्यतिः॥ स्त्रीसंभोगसकृन्मोहाद्बुद्धिना
नेन शुध्यति॥ स्मृत्यंतरे॥ अंतःप्रक्षाल्य लिंगस्य यतिश्चांद्रायणं चरेत्॥ रेतोत्सर्गं यदा कुर्यात् प्रायश्चित्तं भवेद्यतिः॥
प्राजापत्यत्रयं कुर्यात्प्राणायामशतानि च॥ कपिलः॥ कंडूयनक्षरणे उपवासः चिंतने त्रिरात्रं॥ मधुमांसादिस्वादने च स
कृत्स्त्रीगमने द्वादशरात्र उपवासः॥ त्रिलक्षं जपेदभ्यासे सकृदप्यं स्त्रीगमने ऽरण्यं गत्वा बिल्वादिफलैः स्वपतितैर्व

र्त्तुस्मोरकमन्नं वा भोज्या ददते यतिः॥ आरुणः॥ प्रमादेन प्रायश्चित्तं समाचरेत्॥ त्रिंशत्प्राणायामान् कृत्वा जपेत्त्रिकशतत्रयं॥ अज्ञाना
दर्शे एवं तेषां प्रायश्चित्तं विधीयते॥ अभ्यासादधिकं किंचित्तद्वर्धते दिनसंख्यया॥ एकान्नं तु अहं भुक्त्वा नित्यं तदनापदि॥ प्राणायामशत
कुर्यात्शुध्यर्थं यतिरात्मवान्॥ जमदग्निः॥ कृकलासोक्षीरगले मंडूके गृहगोधिके॥ कुक्कुटादिषु भूतेषु दशाहे चार्धभोजनं॥ मार्जारमूष
के सर्पे स्थूलमत्स्येषु पक्षिषु॥ नकुलादिषु भूतेषु चरेच्चांद्रायणव्रतं॥ पिपीलिकायां सूक्ष्मायां प्राणायामस्त्रयस्त्रयः॥ यूकायां म
त्कुणे चैव मशके यं च निर्दिशेत्॥ मूलांकुरेषु पत्रेषु पुष्पेषु च फलेषु च॥ स्थावराणां चोपमर्दे प्राणायामस्त्रयस्त्रयः॥ धान्यदेसल
तामास्तु स्थावरं जंगमं तथा॥ उत्सादयति मूढात्मा आवीचीं नरकं व्रजेत्॥ अकामादपि हिंसेत पशून् मृगादिकान्यतिः॥ कृच्छ्राति
कृच्छ्रं कुर्वीत चांद्रायणमथापि वा॥ हारितः॥ अन्हारात्र्याश्चयान् जंतून् हिनस्त्यज्ञानतो यतिः॥ प्राणायामान्दशाष्टौ वा प्रा
यश्चित्तं यतिश्चरेत्॥ वायुषेदशा कुर्वीत वाच्ये विंशतिमेव च॥ मानसे त्रिशतं चापि पातके प्राणसंयमान्॥ यमः॥ दिवसे दि
वसे चैव प्राणायामास्तु षोडश॥ अपि रण्यहनं मासान् पुंसं सहरहः कृताः॥ कणपिण्याकतक्रं वा शाकमूलफलादिकं॥
पक्वं वाप्यथवापक्वं पचन्न ज्ञानतो यतिः॥ आचरेत्त्रीणि कृच्छ्राणि प्राकृतान्येव शुध्यये॥ अभ्यासाच्छुद्धिपूर्वं च पाके दोषान्न

खरोष्ट्रांतर्गमनेप्राणायामान्षडाचरेत्॥श्वशूकरश्वांडालांतरगमनेप्राणायामान्द्वादशत्र॥विहितातिक्रमंकृत्वाप्राणायामान्द्वादशैववेति॥
वायव्ये॥अदंडोनैवतिष्ठेतयतिःकुत्रचिदात्मवान्॥यदितिष्ठेत्प्रातिदिनंप्राणायामशतंचरेत्॥दंडालनस्तुचांडालेव्यवधानेनभिक्षुकः॥प्रा
णायामत्रंकुर्यान्मात्राभेदैस्तथैवच॥शूद्रेणव्यवधानेनप्राणायामास्तुषोडश॥द्वादशाष्टौचचत्वारिविट्क्षत्रियद्विजोत्तमैः॥जलांतरारि
क्षितेषुनकश्चिद्दोषभाग्भवेत्॥भक्ष्यदंडादिकंचैवजलेगाधेक्षिपेद्यतिः॥मद्यमूत्रपुरीषैश्वशुक्रकीलालशोणितैः॥स्पृष्टंदंडंसजेद्भिक्षुः॥
श्रेषेसंस्कारमर्हति॥प्रातःस्नानंविनाकामात्प्राणायामशतंचरेत्॥एवमेवतुसायाह्नेमध्याह्नेतुसहस्रकं॥प्रेतश्राद्धेयतिर्भुक्त्वा
चरेच्चांद्रायणत्रयं॥पितृस्थानंविनाश्राद्धेभुक्त्वातथैवतु॥एकश्वेसैत्रकेस्थानेद्वितीयेवैश्वदेविके॥श्राद्धदिनेविनाश्राद्धेभु
क्त्वासांतपनंचरेत्॥बहुभोज्येयतिर्भुक्त्वाकुर्याद्दत्तद्रुतंपुनः॥वाग्दंडोहंतिवैज्ञानंमनोदंडःपरांगतिं॥कर्मदंडस्तेत्रीन्लोकानूह
न्यादपरिरक्षितः॥वाग्दंडेमौनमातिष्ठेत्कर्मदंडेत्वभोजनं॥मानसेतुकृतेदंडेप्राणायामोविधीयते॥एकस्मिन्निमित्तेगुरु
लघुप्रायश्चित्तविधानंतुविद्वद्विद्वत्सुबुद्धिपूर्वाप्रसज्याःप्रसज्यादिविभागतोदृष्टव्यं॥तत्रापिमंदमध्यमोत्तमाधिका
दिभिरवधारिकृतचित्तैस्तुकृच्छ्रचांद्रायणप्रणवजपप्राणायामादयःकार्याः॥वशीकृतचित्तैस्तुध्यानमेवकार्यं॥उक्तंच॥
प्रायश्चित्तेषुसर्वेषुयतेर्ध्यानंविशिष्यते॥प्रणवस्यजपेवाथमूलमंत्रस्यसंस्मृतिः॥आधानमुच्यतेश्रुत्वाप्रणवस्यजपा

मायातितिरिर्दर्जहतोयथा॥
दिषु॥तस्मात्सर्वप्रयत्नेनप्रणवैकपरोभवेत्॥जपात्तज्ज्ञानात्तथाध्यानात्नान्यद्भिक्षोस्तुशोधनं॥तस्मात्तानिसदाकुर्याद्यतिर्मुख्य
र्थमात्मनः॥सर्वपापप्रसक्तोपिध्यायन्निमिषमच्युतं॥द्विजस्तपस्वीभवतिपंक्तिपावनएवसः॥ध्यानेनसदृशंनास्तिशोधनंपा
पकर्मणां॥श्वपाकेष्वपिभुंजानोध्यायीनैवतुलिप्यते॥कृष्णानुस्मरणंदेवपापसंघातपंजरं॥शतधाभेदतोविष्णुर्नराणांसर्वकिल्वि
षं॥यथाविष्णोःस्मृतेसद्यःसंक्षयंयातिपातकं॥तथास्यनात्रामध्येतियत्तुःस्वंव्याधितोभवेत्॥यथाग्निरुद्धतसिखेकक्षंद
हतिसानिलः॥तथाचित्तःस्थितोविष्णुर्नराणांसर्वकिल्विषं॥ज्ञानहृदेध्यानजलेरागद्वेषमलापहे॥यःस्नातिमानसेतीर्थे
सयातिपरमांगतिं॥कलौपित्रादिदोषाढ्योविषमाकृष्टमानसः॥कृत्वापिसकलंपापंगोविंदंसंस्मरन्शुचिः॥शुचिरप्र
यतोवापिसर्वावस्थांगतोपिवा॥यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः॥कलिकल्मषमत्युग्रंनरकार्तिप्रदंनृ
णां॥प्रयातिसंक्षयंसद्यःसकृद्धिष्टोहिसंस्मृते॥अत्रिः॥उपपातकेषुसर्वेषुपातकेषुमहत्सुच॥प्रविश्यरजनीपा
दंब्रह्मध्यानंसमाचरेत्॥ब्रह्महत्यासहस्राणिअगम्यागमनानिच॥एकेनध्यानयोगेनत्रयस्तनाप्यपिक्षणा
त्॥यदिस्यात्सातकंकिंचिद्योगी॥कुर्यात्प्रमादतः॥योगमेवनिषेवेतनान्यमन्त्रकदाचन॥विष्णुपुराणे॥प्रायश्चि

त्वान्यशेषाणि तपःकर्मात्मिकानि वै॥ यानि तेषामशेषाणां कृष्णानुस्मरणं परं॥ कृते पापेनुतापो वै यस्य पुंसः प्रजायते॥
प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परं॥ प्रातर्निशि तथा संध्यामध्याह्नादिषु संस्मरेत्॥ नारायणमवाप्नोति सद्यः पापक्ष
क्षयान्नरः॥ विष्णुस्मरणसंक्षीणसमस्तक्लेशसंचयः॥ मुक्तिं प्रयाति स्वर्गाप्तिस्तस्य विघ्नोनुमीयते॥ वासुदेवमनो
यस्य जपहोमार्चनादिषु॥ तस्यांतरायो मैत्रेय देवेंद्रत्वादिकं फलं॥ क्व नाकपृष्ठगमनं पुनरावृत्तिलक्षणं॥ क्व जपो वासु
देवेति मुक्तिबीजमनुत्तमं॥ तस्मादहर्निशं विष्णुं संस्मरन्पुरुषो मुने॥ न याति नरकं शुद्धः संक्षीणाखिलपातकः॥
मति धर्मसमुच्चये॥ अश्वमेधसहस्रैस्तु वाजपेयशतैरपि॥ यत्पापं विलयं याति स्मृते तन्नश्यति तद्धरेः॥ गंगास्नानसहस्रै
